184601

THE

CHOWKHAMBÀ SANSKRIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS,

NO. 306.

व्याकरणसिद्धान्तसुधानिधिः।

पर्वतीयविश्वेश्वरसूरिविरचितः।

पाण्डवशाखिना परिशोधितः।

VYÂKARANA SIDDHANTA SUDHÂNIDHI.

BY

VISVESVAR SURI,

Edited by

Vyakaranopadhyaya and Sahitya tirth

Pandit Madhava Sastri Bhandari,

FASCICULUS XII -१२

PUBLISHED & SOLD BY THE SECRETARY

CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES.

AGENTS:-OTTO HARRASSOWITZ, LEIPZIG;

PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY;

PROBSTHAIN & CO., BOOKSELLERS LONDON.

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press, Benares.

1924.

Registered According to Act XXV of 1867. [All Rights Reserved.]

S 491.2
V 82
12 P 1-3

अत्राध्वर्युशब्दो यजुर्वेदपरः । तत्रोत्पन्नस्य विनियुक्तस्य वा क्रतोर्वाचकानामक्लीबानां द्वन्द्व एकवत् । अर्काश्वमेधम् । साह्नातिरात्रम् । अध्वर्युपदं किम् । इषुवज्रौ । उद्भिद्बलभिदौ । सामवेद एषां विधानम् । क्रतुशब्दस्य सोमयागेषु रूढत्वादर्शपौर्णमासावित्यादौ नेति वृत्तिः । अनपुंसकं किं राजसूयवाजपेये । अर्धर्चादिपाठात्क्लीबत्वपक्षे प्रत्युदाहरणम् ।

अध्ययनतो ऽविप्रकृष्टाख्यानाम् ॥ ५ ॥

अध्ययनेन निमित्तेन येषामविप्रकृष्टा संनिहिता आख्या तेषां द्वन्द्व एकवत् । पदकक्रमकम् । क्रमकवार्तिकम् । पदं क्रमं वाधीते इति क्रमादिभ्यो वुन् । वृत्तिं संहितामधीते वार्तिकः । उक्थ्यादित्वाद्वुक् पदाध्ययनोत्तरं क्रमाध्ययनं इति पौर्वापर्यं सन्निधिः । अन्त्ये तु क्रमाध्ययनस्य संहिताध्ययनव्यतिरेकप्रयुक्तव्यतिरेकप्रयोगित्वमेव तथेति बोध्यम् । अध्ययनतः किम् । पितापुत्रौ । अविप्रकृष्टेति किम् । याज्ञिकवैयाकरणौ ।

जातिरप्राणिनाम् ॥ ६ ॥

प्राणिभिन्नवृत्तिर्या जातिः तद्वाचिनां द्वन्द्व एकवत् । आराशस्त्रि । जातिः किम् । नन्दकपाञ्चजन्यौ एकव्यक्तिकत्वान्न जातित्वम् । अप्राणीति किम् ।

ब्राह्मणक्षत्रियविट्शूद्राः । नाञ्जिवयुक्तन्यायेन द्रव्यवृत्तिजातेरेव ग्रहः । नेह रूपरसौ । गमनाकुञ्चने । पृथिव्यप्तेजोवायूनामित्यादौ तु द्रव्यप्राधान्यं विवक्षितम् । बदरामलकानीत्यादेरिष्ट्वा-

त्र । रञ्जिता तु विविधास्तरुशैला इत्यादौ मध्यमपदलोपः ।

विशिष्टलिङ्गो नदीदेशोऽग्रामाः ॥ ७ ॥

अग्रामा इति बहुवचनं सौत्रम् । भिन्नलिङ्गानां नदीवाचिनां देशवाचिनां च ग्रामभिन्नानां द्वन्द्व एकवत् । उध्यश्चेरावती च उध्येरावति । कुरवश्च कुरुक्षेत्रं च कुरुकुरुक्षेत्रम् । भिन्नलिङ्गः किम् । मङ्गायमुने । मद्रकेकयाः । नदीदेश इति किम् । कुक्कुटमयूर्यौ 'अग्रामा इत्यत्र नगराणां प्रतिषेधः' अभक्ष्यो ग्रामकुक्कुट इत्यादौ नगरस्यापि ग्रामशब्देन ग्रहणादारम्भः । नगराणां नायं पर्युदास इत्यर्थः । मथुरापाटलिपुत्रम् । 'उभयतश्च ग्रामाणां प्रतिषेधः' । ग्रामनगरयोर्द्वन्द्वे ग्रामनिमित्तः प्रतिषेध एव प्रवर्तते इत्यर्थः । शौर्यं नगरम् । केतवता ग्रामः । शौर्यकेतवते । अग्रामाः किम् । जाम्बवं नगरम् । शालूकिनी ग्रामः । जाम्बवशालूकिन्यौ । देश इह जनपदः तेन पर्वतानां न कैलासगन्धमादने ॥

क्षुद्रजन्तवः ॥ ८ ॥

एषां द्वन्द्व एकवत् । यूकालिक्षम् ।
क्षुद्रजन्तुरनस्थि स्यादथवा क्षुद्र एव सः ।
शतं वा प्रसृतौ येषां केचिदानकुलादपि ॥
पश्चादुपन्यस्त एव पक्षो व्यापित्वाद्द्राह्य इति ग्रन्थकृतः ।

येषां च विरोधः शाश्वतिकः ॥ ९ ॥

विरोधो वैरम् । नतु सहानवस्थानादि । प्रतियोग्यभावयो-

रित्यादावतिप्रसङ्गात् । शाश्वतिकः सार्वदिकः । निपातनादिकादेशः तत्त्वं चात्र एकार्थाभिनिवेशपयुक्तत्वाभावः । गोव्याघ्रम् । गजसिंहम् । शाश्वतिकः किम् । देवासुरैरमृतमम्बुनिधिर्मन्थे । एतेन तेषां न नित्यो विरोधो मथनप्रवृत्तिकाले तदभावादिति निरस्तम् । कालानवच्छिन्नत्वेन वैरविवक्षायां गोव्याघ्रमित्यादावव्याप्तेः । विषयान्तरसंचारसुषुप्त्यादौ तद्विच्छेदस्यावश्यकत्वात् । इह पशुशकुनिद्वन्द्वैकवद्भावविकल्पस्यावकाशो महाजोरभ्रं महाजोरभ्राः । हंसचक्रवाकम् । हंसचक्रवाकाः । येषांचेत्यस्य श्रमणब्राह्मणम् । मार्जारमूषकम् । अश्वमहिषम् । काकोलूकामित्यत्र परत्वाद्विभाषा प्राप्ता चकारस्य निर्धारणार्थतया तां बाधित्वा एकवद्भाव एव । तेन पशुशकुनिद्वन्द्वे विरोधिनां पूर्वविप्रतिषेध इति नारभ्यम् ।

शूद्राणामनिरवसितानाम्॥१०॥

अबहिः कृतानां शूद्राणां द्वन्द्व एकवत् । तक्षायस्कारम् । रजकतन्तुवायम् । निरवसानं बहिःकारः । तच्चार्यावर्तादि स च प्रागादर्शात्प्रत्यक्कालिकवचनात् । दक्षिणेन हिमवन्तं उत्तरेण पारियात्रमिति भाष्यम् । आदर्शादयः पर्वतविशेषा इति कैयटः । एवं तु किष्किकगान्धिकं शाकयवनम् । शौर्यक्रौञ्चमिति न सिध्येत् । ग्रामघोषनगरादिभ्यो बहिर्भावविवक्षायां चण्डालमृतपा इत्यादावव्याप्तेः । यज्ञात्कर्मणस्तदुक्तौ तक्षायस्कारमिति न स्यात् । तस्मात्पात्रादबहिः कृतानामित्येवार्थः ।

गवाश्वप्रभृतीनि च॥११॥

एतानि कुतैकवद्भावानि निपात्यन्ते । गवाश्वम् । गवाविकम् । गवैडकम् । अजाविकम् । अजैडकम् । एषां पशुद्वन्द्वविकल्पः प्राप्तः । कुञ्जवामनम् । कुञ्जकैरातम् पुत्रपौत्रम् । श्वचण्डालम् । स्त्रीकुमारम् । दासीमाणवकम् । उष्ट्रखरम् । शाटीपच्छदम् । प्राणिजात्यर्थानां विभक्त्यर्थः । अप्राणिजातीनामबहुपक्रत्यर्थः पाठः । उष्ट्रशशम् । मूत्रशकृत् । मूत्रपुरीषम् । यकृन्मेदः । मांसशोणितम् । दर्भपूतीकम् । अर्जुनपुरुषम् । तृणोलपम् । दासीदासम् । अत्र पुमान्स्त्रियेत्येकशेषाभावः । कुटीकुटम् । भागवतीभागवतम् ।

अत्रवार्तिकम् । 'गवाश्वप्रभृतिषु यथोच्चारितं द्वन्द्ववृत्तं' यद्रूपविशिष्टमुच्चारितं तत्रैवैकवद्भाव इत्यर्थः । तेनावङादेशाभावपक्षे न । 'अपशवो वा अन्ये गोअश्वेभ्यः पशवो गोअश्वाः ॥'

॥ विभाषावृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्॥१२॥

शकुन्यन्तानां द्वन्द्वः अन्यत्कण्ठोक्तं द्वन्द्वत्रयं चैकवद्वा । वृक्षादौ विशेषग्रहणम् । एकपदस्य द्वन्द्वाभावात्पदद्वयैकशेषात् पर्यायद्वयस्यापि विरूपाणामपि समानार्थानामित्येकशेषात् । सामान्यविशेषयोश्च द्वन्द्वनिषेधस्य वाचनिकत्वात् । प्राच्यभरतेष्वितिनिर्देशादनित्यत्वेऽपि प्रकृते निषेधस्यैव प्रवृत्तेः । प्लक्षन्यग्रोधम् प्लक्षन्यग्रोधाः । रुरुपृषतम् । रुरुपृषताः । कुशकाशम् । कुशकाशाः । व्रीहियवम् । व्रीहियवाः । दधिघृतं दधिघृते ।

गोमहिषम् । गोमहिषाः । तित्तिरिकापिञ्जलम् । तित्तिरिकापिञ्जलाः । अश्ववडवम् । अश्ववडवौ । पूर्वापरम् । पूर्वापरे । अधरोत्तरम् अधरोत्तरे ।

अत्रवार्तिकम्—'बहुप्रकृतिः फलसेनावनस्पतिमृगशकुनिक्षुद्रजन्तुधान्यतृणानाम्' ॥ समस्यमानपदानां बहुवचनान्तत्वे सत्येवैषां द्वन्द्वः एकवद्भवति नान्यथेत्यर्थः । अनेन प्रकरणविहत एवैकवद्भावो नियतविषयत्वेन व्यवस्थाप्यते नत्वेतत्सूत्रविहित एव । प्लक्षन्यग्रोधावित्यत्र जातिरप्राणिनामिति नित्यैकवद्भावप्रसङ्गात् । बदरामलकम् । बदरामलकानीति भाष्यम् । तत्र बदरामलकानीति प्राप्ते जातिरप्राणिनामिति नित्य एकवद्भाव इति व्याचष्ट कैयटः ।

केचित्तु नित्य एकवद्भावे प्राप्ते विकल्पोऽनेन क्रियते इत्याहुः ।

अन्ये तु अस्य बहुप्रकृतिके विकल्पविधिपरत्वेऽन्यत्र नित्यैकवद्भावापत्त्या बदरामलके तिष्ठत इति भाष्यविरोधान्नेदं युक्तमित्याहुः ।

अत्रायं वाक्यार्थः । फलादीनां द्वन्द्वोऽनेन लक्षणान्तरेण वा एकवद्भवन् बहुप्रकृतिरेव । तेन प्लक्षन्यग्रोधौ, व्रीहियवौ, कुशकाशौ इत्यादौ प्रकृतविकल्पो जातिरप्राणिनामिति निषेधश्च न । एतत्सूत्रोपात्तानां तु विषयविभागः प्रदर्श्यते । अप्राणिनां नित्यं प्राप्ते विकल्पो विधीयते सचैकजातिव्याप्यानां जातीनां—पदार्थविभाजकोपाधिसाक्षाद्व्याप्यजातिव्याप्यानामिति यावत् । विजातीयानां तु यथाप्राप्तं । व्रीहिकुशप्लक्षमित्यत्र जातिरप्राणिनामिति नित्यः प्लक्षशब्दस्पर्शम् । प्लक्षशब्दस्पर्शाः, इत्यत्र चार्थे द्वन्द्व इत्युभयम् । अद्रव्यवृत्तिजातितया शब्दत्वादेर्जातिरप्राणि-

नामित्यस्याप्रवृत्तेः । हस्त्यश्वादिषु सेनाङ्गत्वान्नित्यं प्राप्तो विकल्पः । मृगशकुन्यंशे तु यो विभाषा प्राप्त एकवचनो द्वन्द्वः स मृगविशेषाणां तैरेव सह नान्यैरिति । इतरैः सह त्वितरेतरयोग एवेति फलितोऽर्थः ।

तेन पूर्वापरम्, अधरोत्तरमिति व्याख्यातम् । अश्ववडवग्रहणं पशुद्वन्द्वत्वादेव सिद्धेः प्रतिपदविधानार्थम् । तेनैकवद्भावपक्षे पूर्ववदश्ववडवावित्येतद्भाषित्वा सनपुंसकमित्यस्य प्रवृत्तिः । तच्छब्देनैकवद्भावविशिष्टपरामर्शात् । पूर्ववदिति तु एकवद्भावाभावपक्षे प्रवर्तते इति ॥

विप्रतिषिद्धं चानधिकरणवाचि ॥ १३ ॥

नियमार्थमिदम् । एकवद्भावविशिष्टो यो द्वन्द्वो विकल्पेन प्राप्तः स विरुद्धवचनानां यदि भवति तदा अद्रव्यवाचिनामेवेति । तेन विरुद्धद्रव्यार्थानामितरेतरयोग एव । शीतोष्णे उदके स्तः । अत्र विरुद्धत्वं परस्परात्यन्ताभावसामानाधिकरण्यं परम्परया जलस्योष्णत्वं तद्वारको गुणद्वयविशिष्टजलयोर्विरोधः । विप्रतिषिद्धं किम् । नन्दकपाञ्चजन्यम् । पाक्षिकः समाहारद्वन्द्वः । कामक्रोधाविति प्रत्युदाहृतं वृत्तौ । तत्राहुः—शीतोष्णं सुखदुःखमित्यादिवत्पाक्षिकैकवद्भावो दुर्वारः । प्रकृतसूत्रस्य नियमार्थत्वात् । नचाद्रव्यवाचिनां यदि भवति तदा विप्रतिषिद्धानामेवेति तदभिप्रायः । शीतोष्णे उदके इत्यस्यानधिकरणवाचीत्येतत्प्रत्युदाहरणतया तत्रैव लिखितत्वात्, उक्तरीत्या तत्रापि पाक्षिकैकवद्भावापत्तेः ।

...वत्यादौ समाहारद्वन्द्वे नपुंसकता स्यादिति वदन्ति । एतेन जन्माद्यस्य यत्न इति सूत्रे जन्मादीति सौत्रनपुंसकत्वानुरोधेन जन्मस्थितिभङ्गमिति शाङ्करभाष्यं व्याख्यातम् ।

अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः । पञ्चपूली । अतइत्यधिकारे द्विगोरिति ङीप्विधानं चेह लिङ्गम् । 'वावन्तः' आवन्तोद्विगुः स्त्रियां वा । पञ्चखट्वम् । पञ्चखट्वी । स्त्रीत्वपक्षे उपसर्जनह्रस्व इति पूर्वं व्याख्यातम् ।

'अनो नलोपश्च, वा च द्विगुः स्त्रियाम्' । पञ्चतक्षम् । पञ्चतक्षी । नचान्तर्वर्तिविभक्त्या पदत्वान्नलोपसिद्धिरिति वाच्यम् । उत्तरपदत्वे चापदादिविधाविति प्रत्ययलक्षणनिषेधात् । 'पात्राद्यन्तस्य प्रतिषेधः' । पञ्चपात्रम् । त्रिभुवनम् । चतुर्युगम् । द्विमासम् । पात्रादिराकृतिगणः ।

अव्ययीभावश्च ॥१८॥

नपुंसकं स्यात् । अधिस्त्रि उन्मत्तगङ्गम् । पूर्वपदार्थप्राधान्ये लिङ्गाभावे, अन्यपदार्थप्राधान्ये विशेष्यलिङ्गे प्राप्तेऽयमारम्भः । चकारात्पुण्याहम् । सुदिनाहम् । 'पुण्यसुदिनाभ्यामहःक्लीबत्वम्' । कर्मधारये राजाहःसखिभ्यइतिटच् । रात्राह्नाहाः पुंसीत्यपवादः । सुदिनशब्दःप्रशस्तार्थः । 'सुदिनासु सभासु कार्यमेतत्प्रविचिन्वीत विशेषतः स्वयंवे'तिदर्शनात् ।

'पथः संख्याव्ययादेः' । त्रयाणां पन्थाः त्रिपथम् । विरूपः पन्थाः विपथम् । समासान्ताव्यभिचारिसंख्यादिपथशब्दसाहचर्यादव्ययादेरपि कृतसमासान्तस्यैवेदम् । नेह । अतिपन्थाः सुपन्थाश्चेति । नपूजनादिति समासान्तनिषेधः । स्वतिभ्यामेवेति परिगणनात्सत्पथश्चार्चितेऽध्वनीति सिद्धम् ।

व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः ।
इत्यत्र विपथं कापथमित्येवपाठ इति क्षीरस्वाम्यादयः ।

केचित्तु वारः पथश्च मार्गश्चेति त्रिकाण्डशेषात्पथेगताविति-स्मादाचि पथते व्याप्नोतीति पथशब्दोऽकारान्तः । नचैवं विपथ इत्यादि रूपसिद्धावपि कापथ इत्यस्यानुपपत्तिः । काशब्दस्य पथिशब्दे एव विधानादिति वाच्यम् । ईषदर्थे कादेशे कुत्सायामर्थतः पर्यवसानादित्याहुः ।

अन्ये त्वेवं सति पथोविभाषेति सूत्रवैयर्थ्यं स्यात् । अपथमित्यस्य पथशब्दादेवापथं नपुंसकमित्यनेनापन्था इत्यस्य च पथिशब्देनैव सिद्धेरित्याहुः ।

अपरे तु अपथं नपुंसकमिति कृतसमासान्तनिर्देशसामर्थ्यात्पथिशब्दे नञस्तत्पुरुषादिति समासान्तनिषेधस्य असख्नेत्यादौ चरितार्थस्य नित्यं बाधः प्राप्तः अतोऽपन्था इत्यस्य सिद्धये पथोविभाषेति सूत्रमित्याहुः ।

तच्चिन्त्यम् । पथशब्देनैवोक्तरीत्याऽपथशब्दसिद्धौ तद्बाधेऽपि क्षतिविरहात् । अपथमित्यत्र कृतसमासान्तस्य पथो निर्देश इत्याग्रहस्य निर्बीजत्वात् । पथःसंख्याव्ययादेरित्यत्र षष्ठ्यन्तविशेषणान्वयादेव पथिशब्दनिर्देशनिर्णयसंभवात् । अपथोविपथः कापथ इत्यादिरूपासिद्धिरिष्टापत्तेश्च । एतेनापथं नपुंसकमितिसूत्रे रात्राह्नाहाः इति सूत्रानन्तरं पथः संख्येतिवार्तिकस्य पठितत्वात्क्रमानुरोधात्कृतसमासान्त एव न्याय्य इत्यपास्तम् । प्रयोजनामात्रे साहचर्यस्याकिञ्चित्करत्वात् ।

यत्तु वार्तिकस्यावश्यकत्वे तेनैवापथशब्दसिद्धौ सूत्रवैयर्थ्यमित्याशङ्क्य कैयटेनोक्तं सूत्रस्य पूर्वकालत्वादिति, तत्र पथशब्द-

मकारान्तं विना नकिञ्चिदनुपपन्नमिति व्यर्थ एव तदुपन्यासः प्रत्युत पथशब्दसत्त्वे सूत्रस्य तद्घटितपथशब्दविषयत्वेनापि व्याख्यातुं शक्यतया भिन्नविषयत्वात् वार्तिकेन सूत्रस्य गतार्थत्वात् शङ्कैव न स्यादिति त्वदुक्तावेव कैयटफक्किकायाः प्रातिकूल्यमिति यत्किञ्चिदेतत् । इदंच क्लीबत्वविधानं परवल्लिङ्गतायां एवापवादः । तेन विपथा नगरीत्यत्र बहुव्रीहौ पन्थानमतिक्रान्तातिपथेति तत्पुरुषे च तदभावः । 'द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषुने'ति अतिपथेत्यत्र परवल्लिङ्गताप्रतिषेधात् । नचैवमुत्पथमिति प्रतीकस्य कुगतीति तत्पुरुष इतिकैयटव्याख्यानविरोधः । तत्रोत्कृष्टः पन्था इति विग्रहेण पथ उद्गत इतिविग्रहाभावेन गतिसमासत्वाभावात्परवल्लिङ्गस्यैव प्राप्तेः । तस्मादुत्तरपदार्थप्राधान्ये इदं क्लीबत्वविधानमिति सिद्धम् ॥

तत्पुरुषोऽनञ्कर्मधारयः ॥१९॥

कर्मधारयशब्दः समानाधिकरणतत्पुरुषपरः । एवंच खण्डशक्तिपक्षे तत्पुरुषस्य पृथक्शक्तिविषयतया नञ्पदेनापि तदन्वयः । तथा च नञ्तत्पुरुषभिन्नः समानाधिकरणतत्पुरुषभिन्नश्च तत्पुरुष इत्यर्थः । केचित्तु नविद्यते नञ्कर्मधारयत्वं यत्र भावप्रधान्यादित्याहुः । अधिकारोऽयम् । ननु संज्ञायामित्युत्तरसूत्रे नास्योपयोगः । संज्ञायां कथान्तस्योशीनरविषयस्य तत्पुरुषादिरिक्तस्य नञ्कर्मधारयरूपस्य वा समासस्यासंभवात् । अनादिसंज्ञाया एव तत्र ग्रहणादिदानींतन्या अनुपादानात् । नाप्युपज्ञोपक्रममितिसूत्रे षष्ठीतत्पुरुषव्यतिरेकेण तदादित्वासंप्रत्ययात् । नापि च्छायेति सूत्रे षष्ठीतत्पुरुषं विना पूर्वपदार्थबाहुल्यानवबोधात् । नापि संभत्र्याशालिति वचनात्संघातार्थस्यैव समाशब्दस्य ग्रहणात् समूहि-

व्यतिरेकेण समूहानुपपत्त्या षष्ठीतत्पुरुषस्यैव ग्रहणसंभवात् इति चेत्सत्यम् । विभाषासेनेत्यादिसूत्रे तदुपयोगात् । तत्रार्थवशात्षष्ठीतत्पुरुषपर्यवसानानुपपत्तेः । तत्पुरुषः किम् । दृढसेनो राजा । अनञ् किम् असेना । अकर्मधारयः किम् । परमसेना । इहाधिकारपाठस्तु मन्दबुद्ध्यनुग्रहार्थमित्याहुः ॥

संज्ञायां कन्थोशीनरेषु ॥२०॥

कन्थान्तस्तत्पुरुषः क्लीबं स्यादुशीनरदेशोत्पन्नकन्थायाः संज्ञा चेत् । सुशमस्यापत्यानि सौशमयः तेषां कन्था सौशामिकन्थम् । संज्ञायां किम् वीरणकन्था । उशीनरेषु किम् । दाक्षिकन्था ।

उपज्ञोपक्रमं तदाद्याचिख्यासायाम् ॥२१॥

उपज्ञायते इत्युपज्ञा । आतश्चोपसर्गे इति कर्मण्यङ् । उपक्रम्यते इत्युपक्रमः । कर्मणि घञ् । नोदात्तोपदेशस्येति न वृद्धिः । उपज्ञाशब्दान्त उपक्रमशब्दान्तश्च तत्पुरुषः क्लीबं स्यात् उक्तधात्वर्थयोः प्राथम्यविवक्षायाम् । पाणिनेरुपज्ञा पाणिन्युपज्ञं ग्रन्थः । नन्दोपक्रमं द्रोणः । आचिख्यासाग्रहणात् संबन्धमात्रविवक्षायां देवदत्तोपज्ञो रथः ॥

छाया बाहुल्ये ॥२२॥

पूर्वपदार्थबाहुल्ये सति छायान्तस्तत्पुरुषः क्लीबं स्यात् । इक्षूणां छाया इक्षुच्छायम् । एकस्येक्षोरुपजीव्यच्छायां प्रत्युपयोजकत्वात् । इक्षुच्छायानिषादन्य इति तु जात्यभिप्राय एकत्वे, आसमन्ता-

निषादिन्य इति केचित् ।

सभा राजाऽमनुष्यपूर्वा ॥२३॥

राजपूर्वो मनुष्यभिन्नपूर्वश्च सभाशब्दः क्लीबं स्यात् । इनसभम् । ईश्वरसभम् । पर्यायस्यैवेष्यते । इदं च सभाशब्दोत्तरमकारप्रश्लेषात्पर्युदासलभ्यमित्युक्तं प्राक् । नेह । राजसभा । चन्द्रगुप्तसभा । विशेषस्य राजत्वानवच्छिन्नशक्यतावत्त्वात् न राजमात्रस्यम् । नृपतिसभामगमन्नेवमान इति तु नृपतिशब्दस्य गजपतिवद्राजविशेषार्थत्वादिति केचित् । नृपतिशब्दे बहुव्रीहिः । सभाशब्देन कर्मधारयः अनञ्कर्मधारय इत्युक्ते नैक्लीबत्वमित्यन्ये । अमनुष्यशब्दो रूढ्या रक्षः पिशाचादिपरः । रक्षःसभम् । नेह काष्ठसभा ।

अशालाच ॥२४॥

शालावाची संघातवाची च सभाशब्दः । राजामनुष्यपूर्वत्वे पूर्वेण पूर्वस्य क्लीबत्वमुक्तम् । संघातार्थार्थमारम्भः । स्त्रीसभम् । स्त्रीसंघात इत्यर्थः । अशाला किम् । अनाथसभा । अनाथकुटीत्यर्थः ।

विभाषासेनासुराच्छायाशालानिशानाम् ॥२५॥

एतदन्तस्य तत्पुरुषस्य वा क्लीबत्वम् ब्राह्मणसेनम् । ब्राह्मणसेना । यवसुरम् । यवसुरा । कुड्यच्छायम् । कुड्यच्छाया । शोभार्थोऽप्यत्र छायाशब्दः । 'क तच्छयच्छायलवोऽपि पल्लवे' । गोशालम् गोशाला । श्वनिशम् । श्वनिशा । कृष्णचतुर्दशीत्याहुः । तिरश्चामपिफलकामनास्तीति पूर्वपक्षोपन्यासार्थं 'शुनश्च-

तुर्दश्यामुपवसतः पश्याम इति शाबरभाष्योक्तेः ।

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः २६॥

एतयोरुत्तरपदलिङ्गसदृशं लिङ्गं स्यात् । कुक्कुटमयूर्यावेमे मयूरीकुक्कुटाविमौ । अर्धं पिप्पल्या अर्धपिप्पली । उत्तरपदार्थप्रधानस्य स्वयमेव सिद्धेः द्वन्द्वस्योभयपदार्थप्रधानतया पर्यायेण लिङ्गद्वयप्राप्तौ नियमार्थं तत्पुरुषे विध्यर्थं च ।

'द्विगुप्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः' । पञ्चकपालः पुरोडाशः । प्राप्तजीविकः । आपन्नजीविकः । अलंजीविकः । निष्कौशाम्बिः । अत्रेदमवधेयम् । अवयवार्थव्यतिरिक्त समुदायाभावपक्षे द्वन्द्वतत्पुरुषयोरित्यस्य सप्तम्यन्तत्वे द्वन्द्वे तत्पुरुषे च यत्परं तद्लिङ्गं भवतीति सूत्रार्थः । तथा च कार्यिणोऽनुपादानात्परशब्दस्य ससंबन्धिकत्वात्तदाक्षिप्तपूर्वपदस्यैव कार्यप्रसङ्गे मयूरीकुक्कुटावित्यत्र पूर्वपदस्य पुंस्त्वातिदेशे स्त्रीप्रत्ययानिवृत्तिः । कुक्कुटमयूर्यावित्यत्र स्त्रीप्रत्ययश्च स्यात् ।

यदि तु षष्ठीनिर्देशो व्यतिरिक्तश्च समुदाय इत्याश्रित्य समासादन्यवल्लिङ्गमतिदिश्यते उत्तरपदार्थलिङ्गसदृशं समासार्थस्य लिङ्गान्तरमिति तदाश्ववडवावित्यत्र परवल्लिङ्गे प्राप्ते पूर्वपदार्थलिङ्गसदृशं लिङ्गं समासार्थस्य विधीयते नतूत्तरपदार्थस्येति स्त्रीत्वस्यानिवृत्तेरापः श्रवणे प्राप्ते लुग् वक्तव्यः स्यात् । तदुक्तम् । 'समासादन्यादितिचेदश्ववडवयोष्टाबूलुगुवचन'मिति । समासार्थस्य पुंस्त्वेऽपि उत्तरपदार्थस्य स्त्रीत्वानपायात् ।

नचोपसर्जनह्रस्वत्वेन निस्तारः । द्वन्द्वे सर्वेषां प्रथमानिर्दिष्टत्वेऽप्युपसर्जनसंज्ञाविरहात् सर्वपदार्थप्रधानत्वात् उपसर्जनसंज्ञाया श्चान्वर्थत्वात् । अतएव राज्ञः कुमार्या इत्यत्र न ह्रस्व इति प्रागु-

क्तम् । नच समुदायार्थेऽवयवार्थस्य गुणभावादुपसर्जनत्वमिति वाच्यम् । व्यतिरिक्तसमुदायरूपद्वन्द्वार्थाभ्युपगमेऽपि अवयवार्थानां कार्यसंबन्धात्फलतः प्राधान्यसत्त्वात् ।

अभ्युपेत्य तु ब्रूमः । एवमपि कुक्कुटमयूर्यावित्यत्र दोषतादवस्थ्यम् । अथ तत्र पुनः स्त्रीप्रत्ययात्सिद्धम् । तदुक्तं 'परवल्लिङ्गमिति शब्दशब्दार्थाविति' तन्त्रादिना लिङ्गाभिधायी प्रत्ययो नमंभवति तत्रार्थस्यैवातिदेशः । मयूरीकुक्कुटाविति यादौ उभयसंबन्धे तूभयोः कुक्कुटमयूर्यावित्यादि । एवं चौपदेशिकस्य ह्रस्वः आतिदेशिकस्य श्रवणंचेति सिद्धमिष्टम् । नच पुनर्ह्रस्वापत्तिः । अनुपसर्जनत्वात्तदन्तस्यापातिपदिकत्वाच्च । नचैवमपि दत्तागार्ग्यायण्यौ, दत्ताकारीषगन्ध्ये इत्यत्रह्रस्वे कृते समासात्पुनःष्फक्ष्यञौ स्यातामिति वाच्यम् । भस्याढेतद्धिते इति पूर्वोत्पन्नयोर्निवृत्तिसंभवादिष्टापत्तेः । मैवम् दत्ता च युवतिश्चदत्तायुवती इत्यत्रातिप्रत्ययद्वयश्रवणापत्तेः । भसंज्ञाविरहेण तत्र पुंवद्भावानुपपत्तेः । तस्मादुपसर्जनह्रस्वे दोष एवेति स्थितम् । इति प्राप्ते ।

सिद्धान्तः 'समासादन्यलिङ्गमिति चेदश्ववडवयोष्टाब्लुम्वचनं निपातनात्सिद्ध'मिति । विभाषावृक्षमृगेति सूत्रे अश्ववडवेति ह्रस्वोच्चारणेन टापो निवृत्तिर्निपात्यते इति भावः । द्विगुप्राप्तेति वार्तिकमपि प्रत्याख्यातं भाष्ये । तथाहि—परवल्लिङ्गंद्वन्द्वस्येत्येव वक्तव्यम् । नचपूर्वकायोऽर्द्धपिप्पलीत्यादेरसिद्धिः । कर्मधारयाश्रयणेनैकदेशिसमासस्यार्द्धनपुंसकमित्यस्य च प्रत्याख्यानात् । नचषष्ठीसमासनिवृत्त्यर्थं तत् । तस्यापीष्टतायाः प्रागुक्तत्वात् । पूर्वापरेत्यत्रापि षष्ठीसमासस्यानभिधानादेव वारणसंभवादिति ।

पूर्ववदश्ववडवौ ॥ २७ ॥

द्विवचनमतन्त्रम् । अर्थातिदेशोऽयम् । परवल्लिङ्गतापवादः । अश्ववडवौ । अश्ववडवान् । अश्ववडवैर्जवनैरित्यादि ॥

हेमन्तशिशिरावहोरात्रे च-च्छन्दसि ॥२८॥

पूर्ववत् । हेमन्तशिशिरावृतूनांपीणामि । हेमन्तश्चशिशिरंच हेमन्तशिशिरौ । हेमन्तः शिशिरोऽस्त्रियामिति शिशिरशब्दस्योभयलिङ्गत्वात्हेमन्तशिशिराविति न पठनीयामिति केचित् । वस्तुतस्तु नपुंसकशिशिरशब्दस्योत्तरपदत्वेऽपि छन्दसि हेमन्तशिशिरावित्यस्य नियमार्थमेतत् । अहोरात्रे शिवे स्याताम् । द्विवचनमतन्त्रम् । अर्थातिदेशतया निपातनत्वाभावात् । तेन 'पूर्वपक्षाश्रितयोऽपरपक्षाः पुरीषमहोरात्राणीष्टका' 'अहोरात्राणि विदधत्' । न चेदं समाहारद्वन्द्वे सत्येकशेषादेव सिद्धम् । तत्रापि पुंस्त्वस्य वक्ष्यमाणत्वात् । लोके तु दुःखे हेमन्तशिशिरे । अहोरात्रौ पुण्यौ ।

रात्राह्नाहाः पुंसि ॥२९॥

एतदन्तौ द्वन्द्वतत्पुरुषौ पुंस्येव । रात्रेः पुर्वभागः पूर्वरात्रः । एकदेशिसमासः । 'अहः सर्वैकदेशे' त्यच् पूर्वाह्णः । राजाहः सखिभ्यइति टच् । 'अह्नोह्न एतेभ्य'इत्यह्नादेशः । अह्नोदन्तादितिणत्वम् । ह्यहः । 'नसंख्यादेः समाहारे' इति अह्नादेशनिषेधः । 'अह्नष्टखोरेव' इतिटिलोपः । परवल्लिङ्गमित्यस्यैवायमपवादः । सन्निधानात् । परत्वात्तु समाहारे नपुंसकस्य बाधः । अहोरात्रः । नच रात्रादीनां समासोत्तरपदानामेवानेन पुंस्त्वं विधीयते । तदन्तस्य तु परवादेस्यनेनैव सिद्धमिति वाच्यम् । समाहारे नपुंसकापत्तेः । तस्य पर-

वादित्येतदपवादत्वात् । नचेष्टापत्तिः । मासेन स्यादहोरात्रः । ते तु त्रिंशदहोरात्र इत्यादिविरोधात् । द्विरात्रस्त्रिरात्र इत्यादौ तु संख्यापूर्वारात्रिरिति लिङ्गानुशासने विशिष्टपुंस्त्वविधानात् वृत्त्याद्युक्तं पुंस्त्वं चिन्त्यम् । 'अनुवाकादयः पुंसीतिवाच्यम्' । अनुवाकः । शंयुवाकः सूक्तवाकः । वाक्यविशेषार्थकत्वात्क्लीबत्वादारम्भः ।

अपथं नपुंसकम् ॥३०॥

तत्पुरुषे । अन्यत्र त्वपथा नगरी । समासान्तविशिष्टनिषेधान्नेह । अपन्थाः ।

अर्धर्चाः पुंसि च ॥३१॥

चकारेण क्लीबानुकर्षः । आदिपरिग्रहार्थं बहुवचनम् । आकृतिगणोऽयम् । तेन गणरत्ने संगृहीतास्तएव चास्माभिरक्षरक्रमेण निबध्यन्ते ।

अर्द्धर्चकूर्चकवचक्रकचा वर्चस्कपङ्क्तवलीकाः ।
निष्कानीकपिनाकाढकमोदककटकटङ्कपिण्याकाः ॥ १ ॥
मञ्चकपञ्चकदण्डकतण्डकषष्टिकचषकसरकशोकाः ।
शाकाशोकौ शुल्कं मस्तकवरका विटङ्कपिटकशूकाः ॥ २ ॥
फलकनपुंसकमूलकपातकनखपुङ्खशङ्खाश्च ।
शृङ्गविडङ्गतडागोद्योगनिदाघा ध्वजव्रजाम्भोजाः ॥ ३ ॥
कुञ्जोवाजःकुक्कुटकिरीटकुटकूटकर्वटकपाटाः ।
नटनिकटशकटकंकटपटपेटमठकण्ठकाण्डदण्डानि ॥ ४ ॥
नीडाण्डमण्डखण्डा खाढतृणस्थाणुत्रेणुरेणुतृणाः ।
तोरणसुवर्णभूषणकार्षापणवारणचरणरणाः ॥ ५ ॥

बाणव्रणापराण्हद्रोणावृतहस्तपलितघृतमृताः ।
कुस्तक्ष्वेडितवृत्तप्रयुतवसन्तामृतायुता वास्तु ॥ ६ ॥
पुन्नपुंसकयोः शेषार्द्धीपण्याककण्टकाः ।
मोदकस्तण्डकष्टङ्कः शाटकः खर्वटोऽर्बुदः ॥ ७ ॥
घातकोद्योगचरकतमालामलका नडः ।
कुष्ठं मुण्डं सीधु पुस्तं क्ष्वेडितं क्षेमकुट्टिमम् ॥ ८ ॥
संगमं शतमानाभिशंवलाव्ययताण्डवम् ।
कविषं कन्दकार्पासं पारावारं युगन्धरम् ॥ ९ ॥
पूयं पत्रीवपात्रीवे यूषं चमसचिक्कसौ ।
अर्द्धर्चादौ घृतादीनां पुंस्त्वाद्यं वैदिकं ध्रुवम् ॥ १० ॥
तन्नोक्तमिह लोकेऽपि तच्चेदस्त्यस्तु शेषवत् ।
पिण्याकंतिलखलि ॥ तण्डकं परिस्वारः—च्छदोगानां ग्रन्थविशेषः । दण्डकं छेदः । खर्वटः चतुश्शतग्रामाणां संग्रहस्थानम् अर्बुदोऽक्षिरोगसंख्याभेदौ । पातको गोहत्यादिः । चरकं वैद्यविशेषः । नडोऽन्तः सुषिरं तृणम् । पुस्तं मांसशष्कुली ।

द्वे कृष्णले रूप्यमाषो धरणं षोडशैव ते ।
शतमानं तु दशभिः धरणैः पलमेवच ॥

इति स्मृतिः । अर्भोऽक्षिरुक् । शंवलः पथि व्ययः । कवियमश्वमुखबन्धनम् । पारमवारंच नदीतीरे । पूयं क्लिन्नासृक् । प्रग्रीवं वातायनम् । पात्रीवं यज्ञोपकरणम् । विष्कमं यवपृष्ठम् । परवल्लिङ्गमित्यतिदेशोपयोगप्रसङ्गात्पाणिनीयलिङ्गानुशासनसूत्राणि व्याख्यायन्ते ।

लिङ्गं । स्त्री । अधिकारसूत्रे एते । आद्यो व्यापकः । द्वितीयः पुंसीत्येतत्पर्यन्तः । ऋकारान्तमातृदुहितृस्वसृयातृननान्दरः । अन्येषामृदन्तानां ङीप्विधानात् । स्वस्रादिसप्तकमध्येच तिसृ-

चतस्र एतत्स्थानिनो स्त्रिचतुरो ऋदन्तत्वाभावात् । पञ्चैवमे स्त्रीलिङ्गाः ।

अन्यूप्रत्ययान्तोधातुः । अनिप्रत्ययान्तेऽवनिरित्यादिः । ऊप्रत्ययान्तश्चमूरित्यादिः । प्रत्ययेतिकिप् । देवयतेः किप् । दयूः । विशेष्यनिघ्न एव ।

अशनिभरण्यरण्यः पुंसिच । अन्यन्तत्वान्नित्यस्त्रीत्वप्राप्तौ पाक्षिकपुंस्त्वार्थमारम्भः । इयमयं वाऽशनिरिति ।

मिन्यन्तः ॥ मिप्रत्ययान्तो निप्रत्ययान्तो धातुः स्त्रियाम् । भूमिः । ग्लानिः । भवामि भवानीत्यादौ असत्त्वभूतत्वान्नातिव्याप्तिः ।

वह्निवृष्ट्यग्नयः पुंसि । पूर्वस्यापवादः ।

श्रोणियोन्यूर्मयः पुंसिच ॥ इयमयं वाश्रोणिः ।

क्तिन्नन्तः ॥ कृतिरित्यादि

ईकारान्तश्च लक्ष्मीरित्यादि

ऊङाद्यन्तश्च कुरूः ॥ विद्या

ख्याद्यन्तमेकाक्षरम् ॥ ईदूदन्तं प्राग्वत् श्रीः । भूः । एकाक्षरं किम् । वातप्रमीः ॥

विंशत्यादिरानवतेः ॥ तदगुणसंविज्ञानो बहुव्रीहिः । आङभिव्याप्तौ । इयं विंशतिः । त्रिंशत् चत्वारिंशत् । पञ्चाशत् । षष्टिः । सप्ततिः । अशीतिः । नवतिः ॥

दुन्दुभिरक्षेषु ॥ दुन्दुभ्या किल तत्कृतं पतितया यद्द्रौपदी हारिता । अक्षेति किम् । केनास्मात्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम् ॥

नाभिरत्रियें ॥ इयं नाभिः ॥

उभावन्यत्र पुंसि ॥ दुन्दुभिर्नाभिश्चोक्तव्यतिरिक्तेऽर्थे पुंसि । नाभिः क्षत्रियः । 'समुच्छ्वसत्पङ्कजपत्रकोमलैरुपाहितश्री-

ण्युपनीवि नाभिभिरितिभारविप्रयोगात्पुंस्त्वमपि । लिङ्गस्य लोकाश्रयत्वात् ।

नाभिर्मुख्यनृपे चक्रमध्यक्षत्रिययोः पुमान् ।

द्वयोः प्राणिप्रतीके स्यात् स्त्रियां कस्तूरिकामदे । इति मेदिनी ।

तलन्तः स्त्रियां स्यात् । शुक्लस्य भावः शुक्लता । ब्राह्मणस्य कर्म ब्राह्मणता । ग्रामाणां समूहो ग्रामता । देव एव देवता ।

भूमिविद्युत्सरिल्लतावनिताभिधानानि । भूर्भूमिः । विद्युत्सौदामनी । सरिन्निम्नगा । लता वल्ली । वनिता योषित् ।

यादो नपुंसकम् । सरिदर्थोऽपि यादःशब्दः क्लीबम् ।

भाःस्रुक् स्रग्दिगुष्णिगुपानहः । इयं भा इत्यादिः ।

स्थूणोर्णे नपुंसकेच । स्त्रियां क्लीबेच स्युः । स्थूणा । स्थूणम् । ऊर्णा । ऊर्णम् । स्थूणा स्तम्भः । ऊर्णा मेषादिलोम ।

गृहशशाभ्यां क्लीबे । नियमार्थम् । गृहस्थूणम् । शशोर्णं शशलोमनीत्यमरः ।

प्रावृट् विप्रुट् रुट्तृट्विट्त्विषः । स्त्रियां स्युः । विप्रुषः स्पर्शमात्रवेद्या जलकणा इति वाचस्पतिमिश्राः ।

दर्विविदिवेदिखनिशान्यश्रिवेशिकृष्योषधिकट्यङ्गुलयः । पक्षे ङीप् । दर्वी । दर्विरित्यादि ।

तिथिनाडिरुचिवीचिनालिधूलि(किकि)केलि छविराज्यादयः । इयं तिथिरित्यादि । तिथयो द्वयोरित्यमरः । निखिलान्निशिपूर्णिमातिथीन् । इतिश्रीहर्षः ।

शष्कुलिराजिकुट्यशनिवर्ति भ्रुकुटि त्रुटि वलि पङ्क्तयः । एतेऽपि स्त्रियां स्युः ।

प्रतिपदापद्विपत्संपत् शरत्संसत्परिषदुषः संवित्क्षुत्पुन्मुत् समिधः । इयंप्रतिपदित्यादि । उषाः प्रातर्देव-

ता । जगद्वन्द्यां देवीमुषसमिव वंदे भगवतीमिति भवभूतिः ।

आशीर्धूः पूर्गीर्द्वारः । इयमाशीरित्यादि ।

अप्सुमनः समासिकतावर्षाणां बहुत्वंच । पुष्पार्थो ऽत्र सुमनःशब्दः । प्रायिकं चैषां बहुत्वम् । एका च सिकता तैलदानेऽसमर्थेति भाष्यम् । समां समां विजायते इति सूत्रम् । वेश्या शशानसुमना इव वर्जनीयेति मृच्छकटिकायाम् ।

स्रक्त्वक् ज्योग्वाग्यवागूनास्फिचः । स्पष्टम् ।

तृटिसीमा संवध्याः । स्पष्टम् ।

चुल्लिवेणि स्वार्यश्च । स्पष्टम् ।

तारधाराज्योत्स्नादयश्च । शलाका स्त्रियां नित्यम् । नित्यग्रहणमन्येषां क्वचिद्व्यभिचारसूचनार्थम् ।

इति स्त्र्यधिकारः

पुमान् । अधिकारोऽयम् । अधिकारान्तरपर्यन्तः ।

घञबन्तः । पाकस्त्यागः । करो गरः । भावार्थ एवेदम् । नपुंसकत्वविशिष्टे भावे क्तल्युड्भ्यां स्त्रीत्वविशिष्टे तु क्तिनादिभिर्बाधितत्वेन परिशेषात् । कर्मादौ तु घञाद्यन्तमपि विशेष्यलिङ्गं 'संबन्धमनुवर्तिष्यते इति भाष्यप्रयोगात् ।

घाजन्तश्च । विस्तरः । गोचरः । चयः । जयः ।

भयलिङ्गभगपदानि नपुंसके । स्पष्टम् ।

नङन्तः । यज्ञः । यत्नः ।

याच्ञास्त्रियाम् । पूर्वापवादः ।

क्यन्तो घुः । किप्रत्ययान्तो घुसंज्ञो धातुः पुंसि । आधिः । निधिः । उदधिः । क्यन्तः किम् दानम् । घुःकिम् । जाङ्गिर्बीजम् ।

इषुधिः स्त्रीच । पूर्वस्यापवादः ।

देवासुरात्मस्वर्गगिरिसमुद्रनखकेशदन्तस्तनभुज-

कण्ठखड्गशरपङ्काभिधानानि । एतत्पर्यायाः पुंसि । देवाः । अमराः । असुरा दैत्याः । आत्मा क्षेत्रज्ञः । स्वर्गः नाकः । गिरिः पर्वतः । समुद्रोऽकूपारः । नखः कररुहः । केशः कचः । दन्तः दशनः । स्तनः कुचः । भुजो दोः । कण्ठः गलः । खड्गः करवालः । शरो मार्गणः । पङ्कः कर्दमः इत्यादिः ।

त्रिविष्टपात्रिभुवने नपुंसके । स्वर्गपर्यायत्वेन प्राप्तपुंस्त्वापवादः ।

द्यौःस्त्रियाम् । द्योदिवोस्तन्त्रेणोक्तिः ।

इषुवाहूस्त्रियाच । चात्पुंसि ।

बाणकाण्डौ नपुंसकेच । प्राग्वत् । नान्तः । राजा । तक्षा । अपवादो वक्ष्यते ।

ऋतुपुरुषकपोलगुल्ममेघाभिधानानि । ऋतुर्यज्ञइत्यादि

अभ्रं नपुंसकम् । मेघनामत्वेन प्राप्तपुंस्त्वापवादः ।

उकारान्तः । प्रभुः । इक्षुः । विशेषवचनाभावे चेदम् ।

धेनुरज्जुकुहूसरयुतनु करेणु प्रियंगवः स्त्रियाम् ।

समासे रज्जुः पुंसिच । कर्कटरज्ज्वा । कर्कटरज्जुना ।

श्मश्रुजानुवसुस्वाद्वश्रुजतुत्रपुतालूनि नपुंसके

वसुचार्थवाची । तेन वसुर्मयूखाग्निधनाधिपेषु इत्यादौ पुंस्त्वम् ।

मदगुमधु शीधुसानुकमण्डलूनि नपुंसकेच । चात्पुंसि । रुत्वन्तः । मेरुः । सेतुः ।

दारुकशेरुवस्तुमस्तूनि नपुंसके । पूर्वापवादः ।

प्राग्रहमेरकारान्तः । राशिमदिवसाभिधानमित्यतः प्राक् अकारान्त इत्यधिकारः ।

कोपधः । स्तबकः कल्कः ।

चिबुकशालूक प्रातिपदिकांशुकोल्मुकानि नपुंसके। पूर्वापवादः। कण्टकानीकसरकमोदक चषकपस्तक पुस्तक तटाक निष्क शुष्कवर्चस्क पिनाक भाण्डक पुलाकानि नपुंसकेच।

टोपधः। अकारान्तत्वे सति टोपधः पुंसि। घटः। पटः। किरीटमुकुटललाटवटवीट शृंगाट कराट लोष्टानि नपुंसके। कुट-कूटकवाटकर्पट तटनिकटकीटकटानि नपुंसकेच। चात्पुंसि।

णोपधः। गुणः। पाषाणः।

ऋणलवणपर्णतोरणरणोष्णानि नपुंसके। पूर्वा-पवादः। कार्षापणस्वर्णसुवर्णव्रणचरणदृषणविषाणचूर्णतृणानि नपुंसके च।

थोपधः। रथः। काष्ठपृष्ठरिक्थोक्थानिनपुंसके।

काष्ठा दिगर्थास्त्रियाम्। इमाः काष्ठाः। तीर्थप्राथयू-थगाथानि नपुंसके च।

नोपधः। इनः। फेनः। जघनाजिन तुहिन कानन वृजि-न विपिन वेतन शमनमिथुनश्मशानरत्ननिम्नचिह्नानि नपुंसके। पूर्वापवादः। मानयानाभिधान नलिनोद्यानशयनासनस्थान चन्द-नालानसंमानवसनभवनसंभावनविभावन विमानानि नपुंसके च।

पोपधः। यूपः। दीपः। पापरूपोडुप तल्पशि-ल्पपुष्पशष्प समीपांतरीपाणि नपुंसके। पूर्वापवादः।

शूर्पकुतपकुणपछीपविटपानिनपुंसकेच। शूर्पः इदं शूर्पमित्यादि

भोपधः। स्तम्भः कुम्भः

तलभं नपुंसकम्। पूर्व स्यापवादः।

जृम्भं नपुंसकेच। मोपधः। सोमः। भीमः।

रुक्म सिध्मयुग्मैध्मगुल्माध्यात्म कुङ्कुमानि नपुं-

सके । पूर्वापवादः ।

संग्रामदाडिमकुसुमाश्रम क्षेमच्चौमहोमोद्दामानि नपुंसकेच । योपधः । समयः । हयः ।

किसलयहृदयोत्तरीयाणि नपुंसके । गोमयकषाय-

मलयान्वयाव्ययानि नपुंसकेच । रोपधः । क्षुरः । अङ्कुरः ।

द्वाराग्रस्फारतक्रचक्रवप्रक्षिप्रक्षुद्रच्छिद्र नारतीरदूरकृकुरन्ध्राश्रश्वभ्र(ग)मीर तिमिरक्रूरविचित्रकेयूरकेदारोदर शरीरकन्दर मन्दारपञ्जरजठराजिरवैरचामरपुष्करगह्वरकुहरकुटीरकुलीरचत्वार काश्मीरनीराम्बरशिशिर तन्त्रमन्त्रक्षेत्रमित्रकलत्रचित्रसूत्रव क्त्रनेत्रगोत्राङ्गुलित्रभलत्रास्त्रशास्त्रवस्त्र पत्र पात्रक्षेत्राणि नपुंसके । पूर्वापवादः ।

शुक्रमदेवतायाम् । इदं शुक्रं रेतः ।

चक्रवज्रान्धकार सारवारपारक्षीरतोमर शृङ्गारभृङ्गारमंदारोशीरतिमिरशिशिराणिनपुंसकेच । सोपधः । वत्सः । वायसः । महानसः ।

पनसबिसबुस साहसानि नपुंसके । चमसांसरसनिर्यासोपवासकार्पासवास मास कांसमांसानि नपुंसकेच । कंसं चाप्राणिनि । कंसोऽस्त्री पानभाजनम् । प्राणिनि तु कंसो राजा ।

समाप्तोऽकारान्ताधिकारः ।

रश्मिदिवसाभिधानानि । एतानि पुंसि । रश्मिः मयूखः । दिवसः । घस्रः ।

दीधितिः स्त्रियाम् । पूर्वापवादः ।

दिनाहनी नपुंसके । तद्वत् ।

मानाभिधानानि । कुडवः । प्रस्थः ।

द्रोणाढकौ नपुंसकेच । इदं द्रोणम् अयं द्रोणः ।

खारीमानिके स्त्रियाम् । इयं खारी । इयं मानिका ।

दाराक्षतलाजामूनां बहुत्वंच । एते वयंमिमे दाराः ।

नाडयपजनोपपदानि व्रणाङ्गपदानि । अयं नाडीव्रणः । अंपाङ्गः जनपदः । उक्तस्थले क्लीबत्वनिवृत्त्यर्थं सूत्रम् ।

मरुद्गुरुत्तरदक्षिणजः अयं मरुदित्यादि ।

ऋषिराशिदृतिग्रन्थिक्रिमिध्वनिबलिकौलि मौलिरविकविकपिमुनयः । ध्वजगजमुञ्जपुञ्जाः ।

हस्तकुन्त व्रातवातदूतधूर्तसूतचूतमुहूर्ताः । मुहूर्तोऽस्त्रियामित्यमरः ।

खण्डमण्डकरण्डवरण्ड तुण्डगण्ड मुण्डपाखण्ड शिखण्डाः ।

वंशांशपुरोडाशाः । पुरोदाश्यते इति पुरोडाशः । निपातनाङ्डत्वम् ।

ह्रदकन्दकुन्दबुद्बुदशब्दाः । अर्घपाथिमथगृभुक्षिस्तम्बनितम्बपूगाः । पल्लव पल्वल कफरेफ कटाहनिर्व्यूहमठमाणि तरङ्गतुरङ्गगन्धस्कन्धमृदङ्ग सङ्ग समुद्रपुंरवाः ।

सारथ्यतिथिकुक्षिबस्ति पाण्यञ्जलयः । इति पुंल्लिङ्गाधिकारः ।

नपुंसकम् । अधिकारोऽयम् ।

भावे ल्युडन्तः । हसनम् । भावे किप् । इध्मवज्रश्चनः । कुठारः ।

निष्ठा च । भाव इत्यनुवर्तते । हसितम् । गीतम् ।

त्वष्टयञौ तद्धितौ । शुक्लत्वं । शौक्ल्यम् । षित्त्वसामर्थ्यात्पक्षे स्त्रीत्वम् । चातुर्यम् । चातुरी । सामग्र्यम् । सामग्री ।

कर्मणिच ब्राह्मणादिगुणवचनेभ्यः । ब्राह्मणस्य कर्म ब्राह्मण्यम् ।

यत्यढक् यगञण्वुञ्छाश्च । भावकर्मणोरनुवृत्तिः ।

स्तेनाद्यत् । स्तेयम् ।

सख्युर्यः । सख्यम् ।

कपिज्ञात्योर्ढक् । कापेयम् ज्ञातेयम् ।

पत्यन्तपुरोहितादिभ्यो यक् । आधिपत्यम् ।

प्राणभृज्जातिवयोवचनोद्गात्रादिभ्योऽञ् औष्ट्रम् । औद्गात्रम् ।

युवादिभ्योऽण् । द्वैहायनम् ।

द्वन्द्वमनोज्ञादिभ्यो वुञ् । पैतापुत्रकम् । मानोज्ञकम् ।

हौत्रादिभ्यः । अच्छावाकीयम् ।

अव्ययीभावः । अधिस्त्रि । 'द्वन्द्वैकत्वम्' । पाणिपादम् ।

अभाषायां हेमन्तशिशिरावहोरात्रेच । अनञ्कर्मधारयस्तत्पुरुषः । अधिकारोऽयम् ।

अनल्पे छाया शरच्छायम् ।

राजामनुष्यपूर्वा सभा । इनसभमित्यादि ।

सुरासेनाच्छायाशालानिशास्त्रियांच ।

शिष्टः परवत् । अन्यस्तत्पुरुषः परवल्लिङ्गः स्यात् ।

रात्राह्नाहाः पुंसि । अपथपुण्याहे नपुंसके ।

संख्यापूर्वारात्रिः । संख्येति किम् । सर्वरात्रः ।

द्विगुः स्त्रियांच । पञ्चमूली । त्रिभुवनम् ।

इसुसन्तः । हविः । धनुः ।

अर्चिः स्त्रियांच । इयमिदंवाऽर्चिः ।

च्छदिः स्त्रियामेव पटलं छदिरित्यमरः । साहचर्यात्क्लीबे इतित्वमरव्याख्यातारः ।

मुखनयनलोहवनमांसरुधिरकार्मुक विवरहल धनान्नाभिधानानि । मुखम् । आननम् । नयनम् । लोचनमित्यादि ।

सीराथौदनाः पुंसि । वक्त्रनेत्रारण्यगाण्डीवानिपुंसिच । अटवी स्त्रियाम् ।

लोपधः । कुलम् । कूलम् । स्थलम् ।

तूलोपलतालकुसूलतरल कवलदेवलवृषलाः पुंसि । अयं तूलः ।

शीलभूलप्रङ्गलसामलकमलतलमुसलकुण्डलपललमृणालवालनिबलपलगलाविडालाखिलशूलाः पुंसिच ।

शतादिःसंख्या । शतम् । सहस्रम् । शतादिरिति किम् । एको द्वौ बहवः । पूर्वपदभ्रमनिरासार्थं संख्यापदम् । शतशृङ्गो नाम पर्वतः ।

शतायुतप्रयुताः पुंसिच ।

लक्षाकोटी स्त्रियाम् । कियती पञ्चसहस्री कियती लक्षाऽपकोटिरपि कियती । 'वा लक्षा नियुतंचतादित्यमरात्क्लीबेऽपि लक्षम् ।

शङ्कुः पुंसि । सहस्रः क्वचित् ।

मन्द्यच्कोऽकर्तरि । मन्त्रन्तो द्यच्कः क्लीबे नतु कर्तरि । चर्म । वर्म । द्यच् किम् । अणिमा । महिमा । अकर्तरिकिम् । ददाति दामा ।

ब्रह्मन् पुंसिच । नामलोमनी नपुंसके । प्रपञ्चार्थम् ।

असन्तो द्यचकः ॥ यशः । मनः तपः । द्यचकिम् चन्द्रमाः ॥

अप्सराः स्त्रियाम् ॥ अ[illegible]पत्रम् । छत्रम् ॥

यात्रामात्राभस्त्रादंष्ट्रावरत्राः स्त्रियामेव ॥ भृत्रामित्र[छात्रपुत्रमन्त्र]वृत्रमेद्रोष्ट्राः पुंसि ॥ तस्यमित्राण्यमित्रास्ते इति माघः ॥

पत्रपात्रपवित्रसूत्रच्छत्राः पुंसिच॥ बलकुसुमयुद्धपत्तनरणाभिधानानि ॥ पद्मकमलोत्पलानि पुंसिच । वापुंसिपद्ममित्यमरः ॥ पद्माद्विमेप्रावृषिखञ्जरीटानिति श्रीहर्षः ॥

आहवसंग्रामौ पुंसि ॥ आजिः स्त्रियामेव । फलजातिः । फलवाची शब्दः क्लीबे । आमलकम् । आम्रम् ॥

वृक्षजातिः स्त्रियामेव । क्वचिदेवेदम् । हरीतकी ॥

वियज्जगच्छकन् कृषत् पृषत् शकृत् यकृदुदश्वितः नवनीतावतानृतामृतनिमित्तावित्तपित्तव्रतरजतवृत्तपलितानि ॥ श्राद्धकुलिशदैवपीठकुण्डाङ्गाङ्गददधिसक्थाज्यस्यदाकाशकण्वबीजानि दैवं पुंसिच ॥ धान्याज्यसस्य रूप्य कुप्यपण्याधिष्ण्यहव्यकव्यकाव्यमत्यापत्यमूल्यशिक्यकुड्यहर्म्यतूर्यसैन्यानि ॥ द्वन्द्वबर्हदुःखबडिशपिच्छबिम्बकुटुम्बशरवृंदारकाणि ॥ अक्षमिन्द्रिये ॥ इति नपुंसकाधिकारः ।

स्त्रीपुंसयोः । गोमणियष्टिमुष्टिपाटलिशाल्मलितृटिमषिमरीचयः ॥ मन्युसिन्धुकर्कन्धु किष्कुकण्डुरेणवः ॥ गुणवचनमकारान्तं नपुंसकंच ॥ त्रिलिङ्गमिति फलितार्थः । पटु, पटुः, पटवी ॥

अपत्यार्थतद्धिते ॥ औपगवः ॥ औपगवी ॥

इति स्त्रीपुंसाधिकारः ॥

पुंनपुंसकयोः घृतभृतमुस्तक्षेलितैरावतपुस्तकवुस्तलाहिरण्य ॥ श्रङ्गार्ह[illegible]ग्रेयमशल्यदृढाः ॥ व्रजकुञ्जकुथकूर्चपुच्छदर्भाङ्कचेदर्भपुच्छाः ॥ कबन्धौषधायुधान्धाः ॥ दण्डमण्डखण्डशवसैन्धवपार्श्वकाशकुशकाशांकुशकुलिशाः ॥ शलाकायां कुशा । अयोविकारः कुशा ।

गृहमेहदेहपट्टपटहाष्टापदाम्बुदककुदाश्च ॥

इति पुंनपुंसकाधिकारः ॥ अविशिष्टलिङ्गम् ॥ अव्ययम् ॥ कतियुष्मदस्मदः । ष्णान्तासंख्या ॥ शिष्टा परवत् ॥ षान्तनान्तभिन्ना संख्या विशेष्यलिङ्गा ॥

गुणवचनं च । धर्मिलिङ्गमित्यर्थः ॥

कृत्याश्च ॥ करणाधिकरणयोर्ल्युट् ॥ सर्वादीनि सर्वनामानि ॥ स्पष्टार्थेयं त्रिसूत्री । इति पाणिनीयलिङ्गानुशासनं समाप्तम् ॥

प्रकृतमनुसरामः

इदमोऽन्वादेशेऽशनुदात्त स्तृतीयादौ॥२२॥

अन्वादेशविषयस्येदंशब्दस्य तृतीयादावनुदात्तोऽशादेशः स्यात् एकस्मिन् विधावुद्देश्यत्वेनोपात्तस्य विध्यन्तरेऽप्युपदेशोपादानमन्वादेशः । पश्चात्कथनमात्रस्य तथात्वे देवदत्तं भोजय इमंच यज्ञदत्तमित्याचक्ष्यमाणस्यैनादेशस्य प्रसङ्गात् । तत्र प्रत्यासत्त्या इदमेव कथितस्यानुकथनमेव तथेतिभ्रान्तिनिरासार्थम्—अन्वादेशश्च कथितानुकथनमात्रमिति भाष्यम् । तेन शब्दान्तरेणेदमा वेति नाग्रहः । अतएवैकस्याभिधेयस्य पूर्वशब्देन प्रतिपादितस्य द्वितीयं प्रतिपादनमन्वादेश इति वृत्तावुम् । उद्देश्यत्वंच तत्कोटिप्रवेशसाधारणम् । वन्यद्विपेनोन्मथितात्वगस्य, अथैनमद्रेस्तनयाशुशोचेत्यत्रास्येत्यस्योद्देश्यत्वविशेषणत्वात् । अथ कथं भीरुरयं त्वमेव तादिमं राधे गृहं प्रापयेति ।

अत्राहुः—तदमुमिति अदःशब्दएव पाठ्यइति । अन्ये तु भीरुरयमिति न विधिः किन्त्वनुवाद इति ।

तन्न । पर्वतोवह्निमानित्यत्र वह्नेरिव विषयतासामान्यस्यैवात्र विधिपदार्थत्वादज्ञातज्ञापकत्वरूपस्य विधित्वस्याविवक्षितत्वात् । अयं भीरुरित्यानुपूर्व्या इदमुद्देशेन भीरुत्वस्य विधेयत्वावश्यकत्वात् । अपूर्वं बोधयितुमित्यस्य कोर्थः, सम्बोध्यं बोधयितुमितिवा यं कंचिदिति वा । नाद्यः । सम्बोधनरहितवाक्ये तदसिद्धेः । तदेनमुल्लङ्घितशासनं विधेरित्यादेरसिद्धेश्च । नान्त्यः । प्रकृतेऽपि तस्य सत्त्वात् ।

तस्माद्वाक्यद्वयस्य परस्परनिरपेक्षत्वे सत्येवान्वादेशः। अत्रापि भीरुत्वस्य तच्छब्देन हेतुत्वप्रतीतेरेकवाक्यत्वान्न तथा। वन्यद्विपेनोन्मथिता त्वगस्येत्यस्य शोचनहेतुत्वेऽपि तस्यशब्दानुपात्तत्वान्नदोष इति के चित्। एतेनायं दण्डोहरानेन। एतमातंडितं विद्यादित्यपि व्याख्यातम्। मर्यादाभिविधौच य इत्यनेन सहैकवाक्यत्वात्। तदुक्तंवृत्तिकारैः—यत्र किञ्चिद्विधाय वाक्यान्तरेण पुनरन्यदुपदिश्यते सोऽन्वादेशः, इहतु वस्तुनिर्देशमात्रं कृत्वैकमेव विधानमिति। एतेन निरपेक्षत्वान्नान्वादेशत्वमित्यपास्तम्। अनु—पश्चादादेशो विधिरिति निराकाङ्क्षत्वस्य प्रतीयमानत्वात्(१)।

यत्तु तथापि तदेनमुल्लङ्घितशासनंविधे र्विधेहि कीनाशनिकेतनातिथिमित्येतद्विरोध इति तन्न। यद्वाक्यापेक्षमन्वादेशत्वं तद्वाक्यार्थमात्रस्यान्वादेश वाक्यार्थहेतुत्वे एवान्वादेशात्वाभावात्। तदेनमित्यत्र चानेकवाक्यार्थानां हेतुत्वादिति दिक्।

हे रोहिणि त्वमसि शीलवतीषु धन्या।
एनं निवारय पतिं सखि दुर्विनीतम्।
जालान्तरेण मम वासगृहं प्रविष्टः।
श्रोणीतटं स्पृशति किं कुलधर्म एषः।

इत्यत्र स्वयं श्रोणीतटं स्पृशति एनं निवारयेति व्यत्यासेन योज्यम्। आशीविषेण रदनच्छददंशदानमेतेन ते पुनरनर्थतया न गण्यमित्यत्र त्वन्वादेशविषयत्वमविवक्षितम्। अभून्नृपो विबुधसख इत्यत्रानद्यतनत्ववदित्याहुः।

ननु टायामोसि चान्वादेशो वक्ष्यते, अन्याः सर्वा हलादय एव विभक्तयः, तत्र इद्भूपलोपेनैवसिद्धमतोऽनुदात्तत्वमात्रं

(१) गम्यत्वादिति पाठान्तरम्।

विधेयमिति चेत् । न, साकच्कार्थमादेशारम्भात् । नहि तत्रेद्रूपलोपो लभ्यते । अक इति प्रतिषेधात् । इमकाभ्यां छात्राभ्यां रात्रिरधीता, अथो आभ्यामहरप्यधीतमिति । शित्करणं तु सर्वादेशार्थम् । अन्यथाऽलोन्त्यस्य स्यात् ।

नचान्त्यादेशे प्रयोजनाभावादेतद्व्यावृत्तिः, सदाद्यत्वेनैव तत्राकारसत्त्वादिति वाच्यम् । आदेशान्तरप्रतिषेधार्थत्वेन सार्थक्यसम्भवात् । मो राजि समः क्वावित्यादिवत् । यद्वाऽकारद्व्यात्मकोयमादेशो ऽनेकाल्त्वात्सर्वस्य भविष्यतीति न कर्तव्यं शित्वम् । यद्वाऽनुदात्तत्वमात्रं विधेयम् । विचित्रास्तद्धितवृत्तय इत्यन्वादेशेऽकचोऽनुत्पत्तेः । महाविभाषाधिकारेण व्यवस्थितविभाषाविज्ञानात् । नचाकचं विनाऽज्ञातार्थानवबोधः । आदेशपक्षेऽपि समानत्वात् । प्रकरणादिना तदुपपादने त्वकचमन्तरेणापि तदुपपत्तेः । लाघवस्य सम्भवात् ।

अत्रेदमवधेयम् । अन्वादेशपक्षे आभ्यामिति सर्वानुदात्तम् । सुप्स्वरेण विभक्तेरप्यनुदात्तत्वात् । अन्वादेशत्वाभावे तु अन्तोदात्तम् । ऊडिदंपदाद्यप्पुम्रैद्युभ्य इति विभक्तेरुदात्तत्वात् । नन्वन्वादेशत्वेऽपि उक्तसूत्रेण विभक्तेरुदात्तत्वं स्यात् । नचेष्टापत्तिः । प्रतेबभ्रूविचक्षणशंसामि, आभ्यां गा अनुइत्यादौ तददर्शनात् । मैवम् । अन्तोदात्तग्रहणानुवृत्त्या अन्तोदात्तादिदमादेः परस्या एव विभक्तेरुदात्तविधानात् । अशश्चानुदात्तत्वात् ।

स्यादेतत् । तथापि सावेकाचस्तृतीयादिर्विभक्तिरित्याद्युदात्तत्वं दुर्वारम् । साविति सप्तमीबहुवचनस्य ग्रहणात् ।

यत्तु हरदत्तः । ऊडिदमिति सूत्रेऽन्तोदात्तानुवृत्तिसामर्थ्यान्नात्र सावेकाच इत्यस्य प्रवृत्तिः । अनेन तेन वा उदात्तत्वे वि-

शेषाभावात् । नच यदीमेना उशत इत्यत्र शसोऽन्यावृत्त्या तस्य चरितार्थत्वम् । तत्र सावेकाच इत्यस्याप्रवृत्तेरिति वाच्यम् । ग्रीवायां बद्धोऽपि कक्ष आसनि मत्स्यं नदीन उदमिक्षियन्तमित्यादिवारणायएकाच इत्यस्यावश्यमनुवर्त्यतया तत एव सिद्धेः । अन्तोदात्तानामेवासन्नित्यादीनामादेशविधौ पाठात् । यद्वा सावितिप्रथमैकवचनमेव ग्राह्यम् । नच त्वयेत्यत्रातिप्रसङ्गः । नगोऽश्वन्स्त्रीष्ववर्णेति प्रतिषेधात् । शेषेलोपष्टिलोप इति पक्षे सावेकाचत्वाभावाच्च । रूपविवक्षायां प्रयोजनाभावादेभिरित्यादौ प्राप्तिरेव नास्तीति ।

तच्चिन्त्यम् । आभ्यामिमेतद्व्यावृत्त्यैवान्तोदात्तानुवृत्तेरुपक्षीणत्वात् । नहि तत्र सावेकाच इत्यस्य प्रवृत्तिः । सप्तमीबहुवचने एषु इत्यत्र ए इतिरूपं तस्याभ्यामित्यत्राभावात्, तथाच एभिरग्ने सुन्वन्तिसोमान्पिबासि त्वमेषामित्यादौ एइति रूपसत्त्वाद्विभक्ते रुदात्तत्वप्रसङ्गः स्यादेव । अन्ये त्वन्वादेशेऽशमुदाहरन्ति । सप्तमीबहुवचनेएष्विति अशादेशे भवत्येकाच् । प्रथमैकवचने त्वयमेकाच् नभवतीति स्वरापसङ्गइति कैयटग्रन्थानुसारादिष्टापत्तिर्वैदिकपाठविरोधात् । द्वितीयसमाधानमप्ययुक्तम् । रूपाविवक्षायां दोषाभ्यां स्वाहेत्यादौ तैतिरीयके मध्योदात्तविरोधापत्तेः । प्रथमैकवचने तस्यैकाच्त्वात् । इन्द्रो जातो वसितस्य राजेत्यत्रान्तोदात्तत्वानुपपत्तेश्च । यानितिरूपस्य षष्ठ्यामभावात् । सप्तमीबहुवचनग्रहणे तु यादिति तकारान्तप्रकृतिरूपस्य षष्ठ्यामपि सत्त्वात्सिद्धं विभक्तेरुदात्तत्वमिति ।

अत्रदीक्षिताः—सावेकाच इत्यत्राप्यन्तोदात्तग्रहणमनुवर्तनीयमतोऽन्वादेशे आभ्यामेभिरित्यादौ नोदात्तत्वप्रसङ्गः । वृत्तिकारादिभिस्तदनुक्तावपिफलानुरोधेन तदनुवर्तने बाधकाभावात् ।

एतदस्त्रतसोस्त्रतसौ चानुदात्तौ ॥३३॥

अन्वादेशविषयस्यैतदोऽशस्यात् सचानुदात्तस्त्रतसोः परतस्तौ चानुदात्तौ स्तः । एतस्मिन् ग्रामे सुखं वसामः, अथो त्राधीमहे ऽतो न गन्तास्मः । त्रतसोः प्रत्ययस्वरेणोदात्तत्वं माभूदित्यनुदात्तारम्भः ।

ननु त्रतासिलोः कृतयोः प्रकृतेर्लित्स्वरेणोदात्तत्वे शेषनिघातेनानुदात्तश्चतयोर्भविष्यतीति त्रतसौचानुदात्तावित्यंशो न कार्य इति चेत् । न, लित्स्वरस्य परत्वेऽपि नित्यत्वादनुदात्तस्यैव प्रसङ्गात् । कृताकृतप्रसङ्गित्वेन तस्य नित्यत्वात् । लित्स्वरस्त्वनुदात्ते कृते नप्रवर्तते । अनुदात्तविधानसामर्थ्यात् । तत्श्च पूर्वस्य उदात्तभाविनो विरहे त्रतसोः यथाप्राप्तः प्रत्ययस्वर एव यथा स्यात् । अपवादनिर्मुक्ते उत्सर्गस्य प्रवृत्तिनियमात् । अत एव गोः पदप्रं वृष्टोदेव इत्यत्र वर्षप्रमाणऊलोपश्चास्यान्यतरस्यामिति णमुल ऊकारलोपस्य च सहविधानात् लित्स्वराभावे प्रत्ययाद्युदात्तत्वे सति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तंपदमिति सिद्धान्तः । तस्मादवश्यारभ्यमनुदात्तत्वम् ।

द्वितीयाटौस्स्वेनः ॥३४॥

द्वितीयायां टापि ओसोश्चेदमेतदोरेनादेशः स्यादन्वादेशविषये । इमं छात्रं छन्दोऽध्यापय, एनं व्याकरणमध्यापयेत्यादि । एतं छात्रं छन्दोऽध्यापय, अथो एनं व्याकरणमध्यापेयत्यादि ।

यद्यपि पूर्वसूत्रे इदमित्यस्य नानुवृत्तिः तथाप्यत्र स्थानि-

विशेषानुपादानादवश्याक्षेप्ये तस्मिन्नपेक्षालक्षणेनाधिकारेण पूर्वसूत्रोपात्तयोरिदमेतदोरनुवृत्तेः स्थानित्वसिद्धिः। एतमातं ङितं विद्यात्, अयं दण्डो हरानेन इत्यादौतु यथादेशस्तथा व्याख्यातम्। तथाचैतच्छब्दस्य पूर्वोक्तार्थचतुष्टयपराकारपरामर्षकत्वात् ङिद्विधावुद्देश्य परामर्शकत्वमेव नास्ति। उभयभिन्नार्थे ङित्वामित्यस्यैव चतुर्थचरणानुसारेणार्थसिद्धत्वात्। अयं दण्ड इत्यत्रापि इदमुद्देशेन दण्ड एव विधेयः।

तथा च पूर्वविधावुद्देश्यत्वेन दण्डस्यानुपादानान्नान्वादेशत्वम्। अतएव पूर्वस्मिन् विधावुद्देश्यत्वेनोपात्तस्येत्युक्तम्। नच तत्र मानाभावः। भाष्याद्युदाहृतस्योक्तप्रयोगस्यैव तथात्वात्।

अथ कथं 'शोणं पदप्रणयिनं गुणमस्य पश्य किंचास्य सेवनपरैव सरस्वती या। एनं भजस्व सुभगे भुवनाधिनाथं केवा भजन्ति तमिमं कमलाशयाने'ति। नचान्वादेशमादाय द्वितीयस्यनान्वादेशत्वमिति वाच्यम्। अन्वादेशलक्षणस्य साधारण्यात्तथाकल्पने मानाभावात्। नच विध्यर्थकप्रत्ययान्तपदघटितवाक्ये एव तदिति वाच्यम्। मानाभावात्। अथैनं प्रत्यबोधयदित्यादिप्रयोगाविरोधाच्च।

उच्यते तत्रेदंशब्दस्योद्देश्यपरामर्षकत्वाभावात्, तच्छब्देनैव निर्दिष्टत्वात्। नच वैय्यर्थ्यम्। संभेदे[१] तदभावात्। अत एव 'योविकल्पमिदमर्थमण्डलं पश्यतीश निखिलं भवद्वपुः। आत्मपक्षपरिपूरिते जगत्यस्य नित्यसुखिनः कुतो भय'मित्यत्र इदंशब्दस्य तच्छब्दसमानार्थकत्वं काव्यप्रकाशादावङ्गीकृतं एवं 'यच्चदर्जितमत्युग्रं क्षात्रं तेजोऽस्य भूपतेः। दीव्यताक्षैस्तदा तेन नूनं तदपि हारितम्,॥ 'करवाल करालदोः सहायो युधि यो-

(१)संभेदे नान्यतर वैयर्थ्यमिति न्यायात्।

ऽसौ विजयार्जुनैकमल्लः । 'यदि भूपतिना स तत्र कार्ये विनियुज्येत ततः कृतं कृतं स्यात्' । इत्यादौ यच्छब्दाव्यवहितोत्तरवर्तिनोस्तददसोरपि उद्देश्यमात्रसमर्पकत्वामित्यप्युक्तम् । एतेन त्वमेव तमिममित्यपिव्याख्यातम् । ऐकपद्येन योजयितुमशक्यत्वात् । नचविनिगमकाभावः । प्राथम्यस्यैव तथात्वात् इमं प्रसिद्धं। यः पूर्वभुक्तस्तं वरुणं केचन भजन्तीत्यर्थात् । एतेन 'विबुधैरसि यस्य दारुणैरसमाप्ते परिकर्मणि स्मृतः । तमिमं कुरु दक्षिणेतरं चरणं निर्मितराग मे हिमे' इति कुमारप्रयोगः । 'तमिमं ज्योतिष्टोमादिभिरिष्टै'रिति कुसुमाञ्जलिश्च व्याख्यातः । अतएव 'तमेतं वेदानुवचनेन विविदिषन्ती'ति बृहदारण्यकं सङ्गच्छते । 'तमात्मेत्येवोपासीतेत्यारभ्येत्येषसेतुर्विधरण' इत्यन्तैः सूत्रादिभिः उक्तम् । एतं बुद्धेः साक्षिणमिति व्याख्यातत्वाच्च ।

'नपुंसकैकवचने एनदिति वक्तव्यम्' । अन्यथाऽतोमित्यम्भावे एनमित्यापत्तेः कुण्डमानय प्रक्षालयैनत्पारिवर्त्तयैनत् । नन्वेवंसर्वत्राप्येनत् एव वक्तव्यः त्यदाद्यत्वेनपुल्लिंगएनमित्यस्यक्लीवसाधारण्येनएनौएनान् एने एनानीत्यस्यचसिद्धेरितिचेत् न एनाङ्कितकइत्यस्यचेष्टत्वात् अंतरङ्गानपिविधीन्बहिरङ्गोलुग्बाधतइतित्यदाद्यत्वं बाधित्वालुक्प्रवृत्तौप्रत्ययलक्षणनिषेधात्त्यदाद्यत्वस्याप्रवृत्तेः ।

अत्रभाष्यं 'यथालक्षणप्रयुक्ते' इति प्रयोगानुपलम्भे लक्षणानुसारेण संस्कारप्रवृत्तिः तत्र नलुमताङ्गस्येत्यत्रांगाधिकारनिर्देशे तद्बहिर्भूते एतदादेशविधौ प्रत्ययलक्षणत्वादेनङ्कितक इति भाव्यं अथांगसम्बन्धिकार्यमात्रेप्रत्ययलक्षणनिषेधो नत्वं ङ्गाधिकारविहितत्वाग्रहः तदा एतङ्कितक इति भाव्यमिति संप्रदायविदः।

केचित्तु एतङ्कितइत्येवभवति सुपोधात्वितिलुकाएनस्यैनदादेशस्यवाबाधात् एनदित्यस्यतकारोच्चारणसामर्थ्यादेकपदाश्रय-

स्वेनांतरंगे स्वमोर्लुकि प्रवृत्तावपि बहिरंगे समासलुकि तदप्रवृत्तेः ।

आर्द्धधातुके ॥ ३५ ॥

ण्यक्षत्रियेतियावदधिकारोयं ननु व्यक्तौ पदार्थे तत्तद्व्यक्तीनां विशिष्य शास्त्रतात्पर्यविषयत्वादार्द्धधातुक इति परसप्तम्याभाव्यं तथाच पूर्वमार्द्धधातुकप्रत्ययोत्पत्तिः ततोवक्ष्यमाणैरादेशैर्भाव्यं अन्यथानिमित्ताभावात् तत्रार्द्धधातुकविशेषाश्रयेषुजग्ध्यादिषुयद्यपिनदोषस्तथापिसामान्याश्रयेषु अस्तेर्भूः अजेर्वी चक्षिङः ख्याञ्जादिषुदोषोदुर्वारः तथाहि भव्यं प्रवेयं आख्येयं इति नस्यात् ण्यत्प्रत्ययोत्तरं आदेशेतच्छ्रवणप्रसङ्गात् पूर्वं हलन्तत्वेनयत्प्रत्ययस्यदुर्लभत्वात नचजातिपक्षमाश्रित्यार्द्धधातुकसामान्यमुपजीव्यं नतुविशेष इति वाच्यं निर्विशेषसामान्याभावात् लव्यंपव्यमित्यादावार्द्धधातुकसामान्ये गुणावादेशयोः कृतयोर्हलंतलक्षणस्यण्यतोदुर्वारित्वाच्च । दित्स्यंधित्स्यमिति आर्द्धधातुकसामान्येअतोलोपेकृतेण्यत्प्रसङ्गाच्च नचाविशेषेणजग्ध्यादीन्विधायसार्वधातुकेनेतिनिषेधोविधास्यतेनत्वार्द्धधातुकइत्यधिकार इति वाच्यं सूत्रभेदप्रसङ्गात् ।

उच्यते जातिपक्षएवाश्रयणीयः नचादित्स्यमितिदोषः अचोयदित्यत्रत्यमज्ग्रहणमजंतभूतपूर्वादपितदर्थमिति वक्ष्यमाणत्वात् नचजातेः परत्वासम्भवः अतएवविषयसप्तम्याश्रयणात् तथाचार्धधातुकविवक्षायां प्रथमतएवादेशादिप्रवृत्तौ पश्चाद्यथानिमित्तं प्रत्ययविशेषाव्यवतिष्ठन्ते बुद्धिस्थत्वं च अभिव्यक्तेप्रत्ययविशेषे आर्द्धधातुकमित्याकारकबुद्धिविषयत्वमेवेति बोध्यं । व्यक्तिपक्षेतुआर्द्धधातुकास्वितिपठितव्यं अर्श आदित्वादच् सति सप्तम्या आर्द्धधातुकपरासुशब्दसंहतिषुव्युत्पाद्यमाना-

स्वस्त्यादीनां भ्वादय आदेशाइत्यर्थः । नन्वङ्गाधिकारस्थेआर्द्धधातुकाधिकार एवजग्ध्यादीन्विधायायमधिकारस्त्यज्यतां मैवं जक्षतुः अधिजगेअध्यगीष्ट नभूव विव्यतुः इत्यत्रतत्तदादेशानामाभीयत्वेनासिद्धत्वादुपधालोपाल्लोपेत्वबुग्यणामभावापत्तेः । नच तर्हि तेप्यत्रैव विधीयन्तामिति वाच्यम् । गतो गतवानित्यत्रानुनासिकलोपस्य सिद्धत्वादतोलोपापत्तेः । आर्धधातुकोपदेशकाले यदकारान्तमिति व्याख्यायासिद्धवत्सूत्रप्रवृत्त्याख्याने तु एक आर्द्धधातुकाधिकारो मास्तु। अङ्गस्यैवाधिकारस्य विषयसप्तमीत्वं परसप्तमीत्वं चेतिज्ञापकबलेनोभयरूपतासम्भवात् ।

अदोजग्धिर्ल्यपि किति ॥३६॥

अदो जग्ध्यादेशः स्यात् । ल्यपि तादौ कितिच । प्रजग्ध्यम् । जग्धः जग्धिः । अन्नमित्यत्रतुन । अन्नास्म इति निपातनादिति वृत्तिः ।

ननु ल्यबादेशात्पूर्वं क्त्वाप्रत्ययमाश्रित्यैव जग्धिरस्तु किंल्यपः पृथग्ग्रहणेन । नच परत्वात्पूर्वमेव ल्यप् । प्रकृत्यादेशस्य तकारादिप्रत्ययमात्रापेक्षतयान्तरङ्गत्वात् । ल्यबादेशस्य तु पूर्वपदापेक्षसमासापेक्षत्वेन बहिरङ्गत्वादितिचेत् ।

मैवम् । अन्तरङ्गानपिविधीन् बहिरङ्गो लुग्बाधते इति ज्ञापनार्थत्वात् । तेन प्रधाय प्रस्थायेत्यादौ दधातेर्हिभावं स्थाघातोरित्वं च बाधित्वा ल्यबादेशः । अन्यथाऽन्तरङ्गत्वात्तयोः प्रसङ्गे ल्यबादेशस्योपदोशिवद्वचनमनादिष्टार्थं बहिरङ्गलक्षणत्वादिति वचनमाश्रयणीयं स्यात् । तेन प्रदायेत्यत्र न ददादेशः प्रखन्येत्यत्र जनसनेत्यात्वाभावः, येविभाषेति विकल्पः । प्रक्र-

म्येत्यनुनासिकस्य किङ्झलोरिति दीर्घाभावः, आपृच्छ प्रदीव्येत्यत्र नशृउठाविति बोध्यम्। अत एव व्याघ्रभूतिरवादीत्—

जग्धिर्विधिर्लर्यपियत्तदकस्मात्सिद्धमदास्ति कितीति विधानात्।

हिप्रभृतींस्तु सदा बहिरङ्गो ल्यब्भवतीति कृतं तदु विद्धि।
जग्धौ सिद्धेऽन्तरङ्गत्वात्तिकितीति ल्यबुच्यते।
ज्ञापयत्यन्तरङ्गाणां ल्यपा भवति बाधनम्।

लुङ् सनोर्घस्लृ ॥ ३७ ॥

अदेर्घस्लृ आदेशो लुङि सनिच। लृदित्वादङ्। अघसत्। अत्तुमिच्छति जिघत्सति। सन्यङोरिति द्वित्वम्। हलादिः शेषः। सन्यत इत्त्वम्। कुहोश्चुरिति अभ्यासे जकारः। अकुप्वसंख्यानम्। घात्तीति प्रघसः।

घञपोश्च ॥ ३८ ॥

अनयोर्घस्लृ। घासः। प्रघसः। उपसर्गेऽद इत्यप्।

बहुलं छन्दसि ॥ ३९ ॥

घस्तां नूनम्। मन्त्रेघसेत्युपधालोपाभावार्थं बहुलोपादानम्। आत्तामत्तमध्यतो मेदउद्धृतम्। बहुलं छन्दसीत्यडभावः। सग्धिश्चमे। व्याख्यातम्।

लिटि वन्यतरस्याम् ॥ ४० ॥

अदो लिटि अयमादेशो वा स्यात्। जघास आद। नच भ्वादिषु घस्लृ अदने इति स्वतन्त्रोऽपि धातुः तस्य जघासे-

ति, अत्तेश्चादिति सिद्धे किमनेनेति वाच्यम् । तस्यासार्वत्रिकत्वज्ञापनार्थत्वात् । तथाच यत्र लिङ्गं वचनं वास्ति तत्रैव तस्य प्रयोगो नान्यत्र । तथाहि—पाठः शपि परस्मैपदे लिङ्गम् । घसति । घसतु । अघसत् । घसेत् । लृदित्करणमाङि । अघसादित्यादि । अनिट्कारिकासु पाठो बलाद्यार्धधातुके । घस्ता । घत्स्यति इत्यादि । सृघस्यदः क्मरजिति विशिष्योपादानात् घस्मरः । अन्यत्रानभिधानम् ।

वेञो वयिः ॥ ४१ ॥

वेञो लिटि परे वयिरादेशो वा उवाय । ऊयतुः । ऊयुः । 'लिटि वयोय'इति यकारस्य संप्रसारणनिषेधः । ववौ, ववतुः । वविरित्यादि । आदेशाभावपक्षे रूपम् ।

हनो वध लिङि ॥ ४२ ॥

लुङिच ॥ ४३ ॥

अत्र वधादेशः । वध्यात् । अवधीत् । विधिलिङस्त्वार्धधातुकत्वाभावान्न । हन्यात् । अकारस्योच्चारणार्थत्वे लुङि अतो हलादेर्लघोरिति हलन्तलक्षणावृद्धिः स्यात् । हन्तीति वधकः । हन्तेर्ण्वुल् । औपसंख्यानिको वधादेशः । तत्रातउपधाया इति वृद्धिः प्राप्ता, जनिवध्योश्चेति यद्यपि निषिद्धा, तत्रापि स्थानिवद्भावाद्धनस्त इति तकारोऽन्तादेशः स्यात् । अवधीदित्यादौ एकाच उपदेशेऽनुदात्तादिति इट्प्रतिषेधश्च स्यात् । इति प्राप्ते वार्तिकम् । 'आदेशे वृद्धितत्वप्रतिषेध इड्विधिश्चेति । तथाचोक्तवचनादतिप्रसङ्गसमाधानमिति वार्तिकाभिप्रायः ।

भाष्यकृतस्त्वाहुः—अदन्त एवायम्। तेनातो लोपस्य स्थानिवद्भावाद्धलन्तत्वं नास्तीति वृद्धेरप्रसङ्गः। तत्वमप्यलोन्त्यस्य विधीयमानमकारस्य लुप्तत्वान्न भवति। स्वरादिधौस्थानिवत्त्वाभावात्। नापिधकारस्यअल्लोपस्य स्थानिवत्त्वेन धकारस्यान्तत्वाभावात्। स्वोपदेशेऽनेकाच्त्वाच्च नेट्प्रतिषेध इति। अन्यत्स्थानिवत्सूत्रे निर्णीतम्।

अत्मनेपदेष्वन्यतरस्याम्॥४४॥

हनो वधादेशो वा। आत्मनेपदं यो लुङ् तत्परे आर्द्धधातुके। आवधिष्ट। आवधिषाताम्। आवधिषत। आहत। आहसाताम्। आहसत। आङो यमहन इत्यात्मनेपदम्। हनः सिजिति कित्वम्। अनुदात्तोपदेशेति नलोपः। पूर्वसूत्रे योगविभागसामर्थ्यादात्मनेपदेषु लिङि नास्य प्रवृत्तिः॥

इणो गा लुङि॥४५॥

इण्गतौ इत्यस्यगा इत्यादेशो लुङि। गातिस्थेति सिचोलुक्। अगात्। इण्वदिक इतिवक्तव्यम्। अध्यगात्। अध्यगुः। आत इति झेर्जुस्।

णौ गमिरबोधने॥४६॥

इणो गमिः स्याण्णौ नतुबोधने। गमयति। बोधने तु प्रत्याययति। इण्वदिक इति वक्तव्यम्। अधिगमयति। इक् स्मरणे।

अत्र केचित्। आर्धधातुकबहिर्भूतानामपि कार्याणामतिदेशः। तेनेणोयण् इक्रोऽपि। अधियन्ति। अधीत्य। एति-

स्तुशास्विति क्यबित्याहुः ।

अन्येतु आर्धधातुकीयानामेवातिदेशादियङेव । अधीयन्ति-अत एव 'ससीतयोराघवयोरधीयन्निति भट्टिरित्याहुः ।

सनि च ॥ ४७ ॥

इणो गमिः स्यान्नतुबोधने । जिगमिषति । बोधने तु प्रतीषिषति । इह सनि कृतेऽजादेर्द्वितीयस्येति वचनात्सनएव द्वित्वम् । सन्यत इतीत्वम् । आदेशप्रत्यययोरिति षत्वम् । बोद्धुमिच्छतीत्यर्थः । अतिदेशादिकोऽपि । अधिजिगमिषति । कर्मणि तङ् । अज्झनगमां सनीति झलादौ सनि दीर्घः । गमेरिट् परस्मैपदेषु इत्युक्तेरात्मनेपदे तदभावात् । जिगांस्यते । अधिजिगांस्यते । अजादेशगमेरेव दीर्घविधानात्सकृतिगमेर्न दीर्घः । जिगंस्यते । सञ्जिगंसते ।

इङश्च ॥४८॥

इङ् अध्ययनेऽस्यगमिः स्यात्सनि । अधिजिगांसते । अध्ययनं कर्तुमिच्छतीत्यर्थः ।

गाङ् लिटि ॥४९॥

इङो गाङ् स्याल्लिटि परे विवक्षिते वा । अधिजगे । नच स्थानिवद्भावादात्मनेपदसिद्धौ ङित्त्ववैयर्थ्यम् । गाङ्कुटादिभ्य इत्यत्रेणो गादेशस्य ग्रहणं माभूदित्यर्थकत्वात् । अन्यथा अगासातां ग्रामौ देवदत्तेनेत्यत्र ङित्त्वादीत्वप्रसङ्गात् । न च गाङ्ङतावित्यस्यैव तत्रोपादानम् । तदीयङकारस्यैवात्मनेपदप्रवर्तनेन चरितार्थत्वादादेश ङित्त्वस्य त्वनन्यार्थत्वेन बलवत्त्वात् ।

अथ सानुबन्धाद्यत्र षष्ठ्युच्चार्यते तत्रेत्संज्ञायामकृतायामेवादेशप्रवृत्तिः । कृतायां वा इत्संज्ञायां तन्निबन्धनकार्याणि न प्रवर्तन्ते इति ज्ञापनार्थं ङकारानिर्देशः । तदुक्तम्—ज्ञापकं वा सानुबन्धस्यादेशवचन इत्कार्याभावस्येति तेन चक्षिङः ख्याञादेशे नित्यमात्मनेपदं न भवति किन्तु ञित्वाद्द्वैकल्पिकमेव । पचमानो यजमान इत्यत्र टितइत्येत्वं न । नन्दना कारका । इत्यत्र युवोरनाकावित्यादेशयोः कृतयोः उगितश्चेति ङीप्, उगिदचामिति नुम् च न भवति । ल्युः कर्तरीत्यमरेण पुंस्त्वोक्तेः प्रायिकत्वात् । अत एव विशिष्य सा भीमनरेन्द्रनन्दनेति श्रीहर्षः ।

नन्वेवं तस्थस्थमिपां तान्तन्ताम इत्यत्र मिपोऽनुबन्धविशिष्टस्य निर्देशादमादेशस्य पित्त्वानुपपत्तौ सार्वधातुकमपिदिति ङित्त्वादचिनवम्, अकरवमित्यादौ ङ्कितिचेति निषेधाद्गुणो न स्यात् । माहिस्मचिनवमित्यत्रानुदात्तत्वं च न स्यात् । एवं षेदवेत्थ इत्यत्रापि तिप्सिपोरादेशे गुणो न स्यादिति चेन्न । पकारमपनीय तस्थस्थीमनामित्येव पठनीयत्वात् । णल्थलोर्विधौ तिप्सिपोरनुबन्धविशिष्टयोरनुपादानाच्च । अत्र भाष्यम् । ञित्करणसामर्थ्यादेव तङ्विकल्पसिद्धेः । तिप्तसिइत्यादौ उपात्तानामेवात्मनेपदानामत्वविधानात् । सिद्धं तु युवोरनुनासिकत्वादिति वक्ष्यमाणत्वात् । ततश्च स्थानिनोरेवोगित्वाभावे तदादेशयोरुगित्वस्य दूरापास्तत्वात्तस्माद्विशेषणार्थमेवङित्त्वमितिस्थितम् ।

विभाषालुङ् लृङोः ॥ ५० ॥

अनयोरिङो गाङ् वा । अध्यगीष्ट । अध्यगीषाताम् । अध्यगीषत । गाङ् कुटेतिङित्त्वात् घुमास्थागेति इत्त्वम् । पक्षेऽध्यैष्ट । अध्यैषाताम् । अध्यैषत । अध्यगीष्यत । अध्यैष्यत ।

णौ च संश्चङोः ॥ ५१ ॥

इङो गाङ् वा स्यात् सन्परे चङ्परे च णौ । अधिजिगापयिषति । अध्यापिपयिषति क्रीङ्जीनां णाविति आत्वम् । अध्यजीगपत् । अध्यापिपत् ॥

अस्तेर्भूः ॥ ५२ ॥

अस्तेर्भूभावः स्यादार्धधातुके । तत्रास्तेः प्रयोगनिवृत्त्यर्थ आरम्भः । भविता । भवितुम् । इन्दामासेत्यादावनुप्रयोगविधानसामर्थ्यान्नभूभावः । अन्यथाऽभूततद्भावेऽस्तिक्रुभूयोगे इति पठित्वाऽस्तिं प्रत्याहाराद्धिः कुर्यात् । यथान्यासे मयो यण इति भकारवकारयोर्द्वित्वेऽर्धमात्रागौरवात् । यद्वा क्रस्चानुप्रयुज्यत इति वा ब्रूयात् । प्रादुरासबहुलक्षपाच्छविः इत्यादौ तिङन्तप्रतिरूपकमव्ययमखण्डमेव । एतेन प्रादुरासुरथ कामकेलय इत्यपि व्याख्यातम् । आसेत्यसतेरिति वामनः । अस गतिदीप्त्यादानेषु । लुका निर्देशादस्य न भूभावः ॥

ब्रुवो वचिः ॥५३॥

ब्रूञ् व्यक्तायां वाचि । अस्य वचिरादेश आर्धधातुके ॥ वचपरिभाषणे लुङ् । वच उम् । अवोचत् ॥

चक्षिङः ख्याञ् ॥५४॥

लिटि च ॥

अत्र भाष्यम् । ख्शाञ् इत्ययमादेशः । पूर्वत्रासिद्धमित्यधि-

कारे णत्वप्रकरणानन्तरं शस्य यत्वं विभाषा वक्तव्यम् । तथाच तस्यासिद्धत्वात्तन्निमित्तककार्यं न भवति। किन्तु शकारनिमित्तकमेव । चर्त्वस्य तु परत्वात्तस्मिन् कर्तव्ये यत्वं सिद्धमेवेति चर्त्वं न प्रवर्तते इति ख्यातेत्यादि सिद्धम् । यत्वाभावपक्षेतु खकारस्य चर्त्वेन ककारे कृते क्शातेत्यादि सिद्धम् ।

तथाच वार्तिकम् । असिद्धे शस्य यवचनं विभाषेति । तेन सुष्ठुप्रचष्टे सुप्रख्यः । आतश्चोपसर्गे इति कः । सुप्रख्यस्य भावः सौप्रख्यम् । योपधलक्षणो वुञ् न किन्तु ष्यञेव । तथासुप्रख्येन निर्वृत्तो देशः सौप्रख्यः तत्र भव इत्यर्थे सौप्रख्यीयः । धन्वयोपधादिति वुञभावे वृद्धाच्छः । आख्यात इत्यत्र संयोगादेरातो धातोर्यण्वत इति निष्ठानत्वाभावः । पुंख्यानमित्यत्र पुमः खय्यम्पर इति रुत्वाभावः । पर्याख्यानमित्यत्र शकारेण व्यवधानात्कृत्यच इतिणत्वाभावः । ख्याप्रकथने इत्यस्यापि तथा लुबयोगाप्रख्यानादिति निपातनात् । नमः ख्यात्रे इत्यत्र सस्थानत्वाभावात् शरूपरे इत्यस्यैव प्रवृत्तिः । जिव्हामूलीयस्येयं पूर्वाचार्यसंज्ञा । तस्मात्खूशाजादेश इति स्थितम् । वर्जने प्रतिषेधो वक्तव्यः । अवसंचक्ष्याः । परिसंचक्ष्याः वर्ज्या इत्यर्थः । असनयोश्चप्रतिषेधः । नृचक्षारक्ष इति वेदे । नृचक्षोरक्ष इति लोके । विचक्षणः । अनुदात्तेतश्च हलादेरिति युच् । बहुलं तण्यन्नवधकगात्रविचक्षणाजिराद्यर्थम् । सर्वप्रकरणापेक्षोयमारम्भः। तणि इतिसंज्ञाच्छन्दसोः पूर्वाचार्यसंकेतः । अन्नम् । अत्र जग्ध्यादेशाभावः । वधक इतिण्वुल् । तत्र वधादेशो विधीयते । गात्रम् । इण औणादिके ष्ट्रनि गादेशः । विचक्षण इति ख्याजादेशाभावः । अजिरेत्यत्र वीभावाभाव इत्यर्थः ।

अत्रेदमवधेयम्–ख्याप्रकथने इत्यप्यदादौ पठ्यते । ससा-

र्वधातुकमात्रविषयः । अन्यथा तस्मान्नमः ख्यात्रे इत्यत्र जिह्वामूलीयस्य दुर्वारतया सस्थानत्वं नमः ख्यात्रे इति वार्तिकस्यासङ्गतिप्रसङ्गात् इति केचित् ।

तच्चिन्त्यम् । तावतापि यत्र जिह्वामूलीयप्रसक्तिस्तादृशसमभिव्याहारे तत्प्रयोगो नास्तीत्येव कल्पयितुमुचितत्वात् । नध्याख्येति नत्वनिर्देशप्रसङ्गाच्च । ख्याप्रकथने इत्यस्यैव प्रतिपदोक्तत्वात्स निषेधो नतु ख्शाजादेशस्य । तत्र यत्वस्य लाक्षणिकत्वादितिकैयटोक्तेश्च । लुब्योगाप्रख्यानादित्यत्र निपातनाण्णत्वाभाव इति प्रतिपादककैयटग्रन्थविरोधाच्च ।

एतेन नध्याख्येत्यत्र ख्याग्रहणं नकर्तव्यमेवेति निरस्तम् । भाष्यवार्तिककाराभ्यां तथानुक्तत्वात् । एतेनख्याधातुरपि ख्शादिर्यत्वविधिरप्युभयसाधारण इति हरदत्तमाधवादिग्रन्थोप्यपास्तः । चक्षिङमुपक्रम्यैव तद्विधानात्सार्वधातुकेऽपि ख्शादिप्रयोगापत्तेश्च । इष्टापत्तेश्च स्वपरग्रन्थविरुद्धत्वात् । एतेन गोसंख्य इत्यत्र गाः सञ्चष्टे इत्येव विग्रह इत्यपि निरस्तम् । अत एव संपूर्वस्य ख्यातेर्नप्रयोग इति तत्र न्यासकारः । अतएव दृशे विख्येचेति सूत्रे ख्यातेरपि केप्रत्यय इति तेनैवोक्तम् । संख्येतिप्रयोगस्तु आदेशस्येति तदभिप्रायः । एतेन ख्याधातौ नेतिकेचिदिति प्राचीनोक्तिर्व्याख्याता । पुंख्यानमित्यत्रफलैकरूप्यार्थं नभवत्येवेत्यर्थकत्वात् । वुञ्रुत्वजिह्वामूलीयानां तुतत्रेष्टत्वात् । रूपद्वये बाधकाभावात् । नचाप्रख्यानादित्यादेशप्रयोगेऽप्युपपत्तेर्ज्ञापकत्वानुपपत्तिः । असनयोश्च निषेधात् । बाहुलके च प्रमाणाभावात् । इति दिक् ।

वालिटि । ५५ ।

पूर्वोक्तं लिटि वास्यात्। चख्यौ। चक्शौ। चचक्षे। चयो द्वितीयाः शरि पौष्करसादेरिति ककारस्य न खकारः।

अजेर्व्यघञपोः। ५६।

अज गतिक्षेपणयोः अस्य वीत्यादेशो वा स्यादार्धधातुकविषये घञमपञ्च वर्जयित्वा। विवाय। विव्यतुः। विव्युः। वीभावनिषेधे क्यच उपसंख्यानम्। समज्या। नचापोऽकारमारभ्य क्यपः पकारेणप्रत्याहारात्सिद्धमिति वाच्यम्। संवीतिरित्यत्र वीभावानुपपत्तेः। वस्तुतो वाग्रहणमनुवर्त्य व्यवस्थितविभाषया व्याख्येयम्। तेन प्रवेता, प्रवेतु, प्रवीतोरथः, संवीतिरित्यत्र वीभावः। समाजः उदाजः। समजनं समज्येत्यत्र तदभावः। तेन बलादावार्धधातुके ल्युटिच विकल्पः। प्राजितेत्यपि सिद्धम्। नियन्ता प्राजिता यन्ता सूत इत्यमरः। प्राजनम्। प्रवयणम्। नचैवं वायावित्यस्य वैयर्थ्यम्। नहि तद्विकल्पार्थम्। अपितु यजिमनीति बाहुलकाद्युचि अजतेर्वीभावविधानार्थम्। तेन वायुरिति सिद्धमिति भाष्यम्। एवं थलादौ आजिथेत्यादि ज्ञेयम्। पूर्वमेव प्रत्ययोत्पत्तेर्हलादित्वाद्यङ्। वेवीयते। यङ्लुक्तु न। लुकाविषयापहारादार्धधातुकव्यक्त्यभिव्यक्त्यभावात। संग्रहः कौस्तुभे उक्तः।

अजेर्वी वेति घञपोः क्यपि चायं न संमतः।
बलादौ यौ च वान्यत्र नित्यमित्येव निर्णयः।

आर्धधातुकाधिकारः समाप्तः।

ण्यक्षत्रियार्षञितो यूनि लुगणिञोः। ५८।

क्षत्रियपदं तद्गोत्रपरम् । ऋषेरपत्यमार्षम् । इतश्चानिञ इति ढकि प्राप्ते शिवादित्वादण् । आर्षयं वृणीते इत्यादौ शुभ्रादित्वाद्वुक् । ण्यप्रत्ययान्तात्क्षत्रियगोत्रप्रत्ययान्ताट्ठ्यमिधायिनो गोत्रप्रत्ययान्तात् ञितश्च परयोर्युवाभिधायिनोराणिञोर्लुक् वा । कुर्वादिभ्यो ण्यः । कौरव्यः पिता । ततो यूनीञ् । तस्य लुक् । कौरव्यः पुत्रः ।

यस्तु तिकादौ कौरव्यशब्दः तत्र कुरुनादिभ्यो ण्य इति विहितक्षत्रियगोत्रोपादानात्कौरव्यायणिरितीफिञ् । इदं तु ब्राह्मणगोत्रम् ण्यः । ऋष्यन्धकेत्यण् । इञ् । तस्य लुक् । श्वाफल्कः पिता । श्वाफल्कः पुत्रः । क्षत्रिय । वासिष्ठाट्ठ्यण् । तत इञ् । तस्यलुक् । वासिष्ठः पिता । वासिष्ठः पुत्रः । आर्ष । विदाद्यञ् । यूनि इञ् । तस्य लुक् । वैदः पिता । वैदः पुत्रः । ञित् । अणो यथा—तिकादिभ्यः । फिञ् । तस्माद्यूनि प्राग्दीव्यतोऽण् । तस्य लुक् । तैकायनिः पिता । तैकायनिः पुत्रः ।

कुत्सायाम् सौवीरगौत्रं च विनेदम् । तत्रफेच्छवेति छप्रसङ्गात् ॥

यमुन्दश्च सुयामाच वार्ष्यायणि फिञः स्मृताः ।

इति परिगणनस्यार्षत्वादितिवृद्धाः । एभ्यः किम् । शिवादिभ्योऽण् । यूनि इञ् । तस्य लुक् । कौहडः पिता । कौहडिः । पुत्रः । यूनि किम् । वामरथ्यस्य छात्राः वामरथाः । कुर्वादिभ्योण्यः । कण्वादिभ्योगोत्रे इति शैषिकोऽण् । वामरथ्यस्य कण्वादिवत्सर्वमिति कुर्वादिषु पाठान्न तस्य लुक् । अणिञोः किम् । दाक्षेरपत्यं युवा दाक्षायणः । यञिञोश्चेति फक् ।

अब्राह्मणगोत्रमात्रायुवप्रत्ययस्योपसंख्यानम् । मात्रपदं कात्स्न्यपरम् । क्षत्रियादिजातिं विनापि अब्राह्मणत्वमात्रेण ततः

परस्याणिञ्भिन्नस्यापि लुगित्यर्थः । बौधिः पिता । बौधिः पुत्रः । जाबालिः पिता । जाबालिः पुत्रः । औदुम्बरिः पिता । औदुम्बरिः पुत्रः । भण्डिजङ्घकर्णखरकौ वैश्यौ ताभ्यामत इञ् । तदन्तात्फको लुक् । भाण्डिजङ्घिः पिता पुत्रश्च । कार्णखरकिरप्येवम् ।

पैलादिभ्यश्च ॥ ५९ ॥

युवप्रत्ययस्य लुक् स्यात् पीलायावेत्यण् । अणो ह्यच इति फिञ् तस्य लुक् पैलः पिता पुत्रश्च । अन्ये पैलादय इञन्ताः । तेभ्य इञः प्राचामिति लुक्सिद्धावप्यग्रागर्थः पाठः । पैलशालङ्कि, सात्यकि, सात्यंकामि, औदव्रजि, औदमेयि, औदञ्चि, औदमञ्जि, दैवस्थानि, पैङ्गलि, औदयिनि, मौलिङ्गि, वाणि, सौमनि, औदमानि, औञ्जिह्मयनि, औञ्जिहानि, औदशुद्धि, आकृतिगणोऽयम् ।

तद्राजाच्चाण इत्यन्तर्गणसूत्रम् । तद्राजसंज्ञकादणः परस्य युवप्रत्ययस्य लुक् । ह्यञ्मगधेत्यण् । अणोह्यच इति फिञ् । तस्य लुक् आङ्गः पिता पुत्रश्च ॥

इञः प्राचाम् ॥ ६० ॥

गोत्रे य इञ् तदन्ताद्युवप्रत्ययस्य लुक् तच्चेद्गोत्रं प्राचाम् । नच प्राचामिति विकल्पार्थम् । अभियुक्तव्याख्यानात् । पन्ने प्राप्तं अङ्गारं येन पन्नागारः । तत इञ् । यञिञोश्चेतिफक् । तस्य लुक् । पान्नागारिः पिता पुत्रश्च(१) । प्राचां किम् । दाक्षिः ।

(१) मन्थरा मन्दा एषणा यस्य मन्थरैषणः विरक्तत्वात् मान्थरैषणिः पितापुत्रश्च इति पुस्तकान्तरे पाठोऽधिकः

पिता दाक्षायणिः पुत्रः ॥

न तौल्वलिभ्यः ॥६१॥

तौल्वबल्यादिभ्यः परस्य युवप्रत्ययस्य पूर्वेण प्राप्तो लुक् न । तुल्वलस्यापत्यं तौल्वलिः पिता । फक् । तौल्वलायनः पुत्रः । तौल्वालि, तैल्वलि, धारणि, पारणि । धारयति पारयतिभ्यां नन्द्यादिल्युः । तत इञ् । दैलीपि, दैवालि, दैवमित्रि, दैवयज्ञि । देवा मित्रमस्य । देवेभ्यो यज्ञमस्येत्यर्थः । प्राणेहति, चापटाकि, आनुहरति, श्वाफाल्कि, आनुमति, आहिंसि, आसुरि, आयुधि, नैमिषि, आसिबन्धकि, वैलि, पौष्कि, पौष्करसादिआनुहारति । पुष्करे तीर्थविशेषे सीदति पुष्करसत् । अनुहरतीत्यनुहरत् । बाह्वादित्वादिञ् । अनुशतिकादित्वादुभयपदवृद्धिः । पौष्यि, वैरकि, वैहति, विलक्षणौकर्णो अस्य वैकार्णिः । कामालि । उपकोशलो हवै कामलायन इति छन्दोग्योपनिषत् । कारेणुपालि । करेणुं पालयति करेणुपालः । श्रीः ।

इति श्रीसिद्धान्तसुधानिधौ द्वितीयस्य चतुर्थपादे
प्रथममाह्निकम् ॥

तद्राजस्य बहुषु तेनैवास्त्रियाम् ६२

तद्राजप्रत्ययस्य लुक्स्यात्स्वार्थमात्रकृते बहुत्वे नतु स्त्रियाम् । ऐक्ष्वाकः । ऐक्ष्वाकौ । जनपदशब्दात् क्षत्रियादञ् तस्य बहुत्वेलुक् इक्ष्वाकवः । इक्ष्वाकूणां दुरापेऽर्थे इति कालिदासः ।

कथं तर्हि ऐक्ष्वाकेषु च मैथिलेषु च फलन्त्वस्माकमद्याशिष इति मुरारिः । अत्राहुः—इक्ष्वाकुषुजनपदेषु भवः । कोपधादण् । अस्य तद्राजत्वाभावान्न लुक् इति । कौरव्याः पशवः । तस्यामेव रघोः पाण्ड्या इत्यादौ कौरव्ये पाण्ड्यच्च साधव इति व्याख्येयमिति । रघूणामन्वयं वक्ष्ये, ते यूयं रघवः प्रसिद्धमहसो यैः सोपि देवाधिपः । निरुध्यमाना यदुभिः कथञ्चिदित्यादौ तद्राजत्वाभावादपत्यप्रत्ययस्य लोपानुपपत्तावपि तदपत्ये लक्षणेति ग्रन्थकृतः । वंशत्वं जन्यजनकान्यतरत्वम् । अन्यस्य दुर्वचत्वात् । तथाच रघोरपत्यानां जन्यान् जनकांश्च वक्ष्ये । जनकत्वं साक्षात्परम्परासाधारणम् । जनकत्वेन रघुपर्यन्तानां जन्यत्वेन दशरथादीनां सङ्ग्रहः । तेषामपिरघोरपत्यत्वात् तज्जनकत्वेनाजस्यापि सङ्ग्रह इति न दोषः ।

प्रकृतमनुसरामः । इह बहुपदं बहुवचनपरमर्थपरं वेति संशयः । उभयत्र लिङ्गसद्भावात् । तथाहि—तेनैवेति वचनमाद्ये लिङ्गम् । तद्धि प्रियो वाङ्गो येषां ते प्रियवाङ्गाः इत्यत्र लुको वारणार्थम् । नचतत्संम्भवति । तद्राजस्य बहुत्वे वृत्त्यभावेन लुगप्रसक्तौ तद्वारणायोपायस्यानुपादेयत्वात् । बहुवचनपरत्वे तु तत्र लुक्प्रसक्तिः । तथाच तेनैवेत्येतदुपादानं स्वप्रयोज्यनिषेधप्रतियोगिप्रसञ्जकत्वेन बहुष्वित्यस्य बहुवचनपरत्वं ग्राहयतीति फलितार्थः,

द्वितीये त्वस्त्रियामिति लिङ्गम् । तद्धि आङ्याः स्त्रियइत्यत्र-लुकोऽप्रवृत्त्यर्थम् । नचोक्तरीत्या तत्रास्ति लुगापत्तिः । स्त्रीप्रत्यय-व्यवहितत्वेन बहुवचनस्य तद्राजात्परत्वाभावात् । भवति तु बहु-र्थत्वे आङ्गीशब्दवाच्यानां स्त्रीणां बहुत्वादिति पूर्ववदर्थपरत्वग्राह-कत्वमिति । तत्राद्यः पक्षः बहुवचने पर लुगित्ययुक्तः । अन्यथा ह्यस्त्रियामिति निषेधः कर्तव्य इति गौरवम् । एतद्रीत्यातु स्त्रीप्रत्यय-व्यवधानादेव तदप्रवृत्तौ निषेधानुपयोगात् । नचाम्बष्ठ्यस्यापत्यानि बहव्यः स्त्रियः आम्बष्ठ्याः । वृद्धेत्कोसलाजादादिति ष्यङ् । यङः श्राविति चाप् । सवर्णदीर्घः । सचान्तवद्भावान्न व्यव-धायक इति लुक्प्रसङ्गात्पूर्वपक्षेऽप्यस्त्रियामित्यावश्यकमिति वाच्य-म् । अचः परस्मिन्निति स्थानिवद्भावेन लुगप्रसक्तेः ।

नच सिद्धान्तेऽपि तेनैवेत्यस्यानुपादानाल्लाघवम् । प्रियवाङ्गा इत्यत्र समासार्थबहुत्वे तद्राजान्तस्य बह्वर्थकत्वाभावादेव लुगप्र-सङ्गादितिवाच्यम् । तथापि गार्ग्यश्च वात्स्यश्च वाज्यश्च गर्गवत्स-वाजा इत्यादौ लोपप्रतियोगिनोऽपत्यप्रत्ययस्यैकस्मिन्नेवार्थे उत्प-न्नत्वात् बह्वर्थत्वाभावाल्लुक् न स्यात् । तदुक्तं द्वन्द्वेऽबहुषु लुग्व-चनमिति लुगर्थं वचनान्तरमारम्भणीयं स्यादित्यर्थः । नचपूर्वपक्षेऽ पि बहुवचनेपरे लुग्विधानात्तस्मिन्नितिनिर्दिष्टपूर्वस्येति परिभाषो-पस्थाने प्रत्येकस्य बहुवचनपरत्वाभावाल्लोपो न स्यात् । समासा-दुत्पन्नस्य बहुवचनस्यान्त्यादेव परत्वादिति वाच्यम् । अन्त्यमात्र-स्य तावत सिद्धेः ।

किञ्च विदस्यापत्यानि बहूनि वैदाः । विदादित्वादञ् । वि-दानामपत्यं युवा वैदः, वैदौ । अतइञ् । ण्यक्षत्रियार्षञित इतिलु-क् । अत्र बहुष्वर्थेषु उत्पन्नोऽपत्यप्रत्ययो युवापत्यविवक्षायां द्वि-त्वविशिष्टे एकत्वविशिष्टेवाऽर्थान्तरे संक्रान्तः । तस्य बहुषूत्पन्नत्वा-

त् लुक्प्राप्तौ अलुगुत्वचनमारम्भणीयं स्यात् । प्रत्ययपक्षेतु बहुवचनपरत्वाभावादेव नलुक् ।

तदुक्तम्—गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोर्लुगिति । द्व्येकयोरितिभावप्रधानो निर्देशः[१]नचात्र गोत्रे ऽलुगचीति सूत्रेणाजादौ प्राग्दीव्यतीये परे लुङ्निषेधादेव सिद्धिरितिवाच्यम् । अजादिप्रत्ययपरत्वाभावात् । वर्णाश्रयेच प्रत्ययलक्षणनिषेधात् । एवं वैदस्य वैदयोर्वाऽपत्यं बहवो माणवकाः विदाः। अत्रापि यञञोश्चेति लुङ्न स्यात् । अञो बहुप्रकृतित्वाभावात् । नच प्रत्ययग्रहणे तदन्तग्रहणादञन्तस्यैव बहुत्वेन विशेषणाल्लुक्सिद्धिरितिवाच्यम् । काश्यपप्रतिकृतयः काश्यपा इत्यत्रातिप्रसङ्गात् । कश्यपस्य गोत्रापत्यं काश्यपः । विदादित्वादञ् । तत्प्रकृतय इत्यर्थ इवेप्रतिकृताविति कन्प्रत्ययः । जीविकार्थेचापण्य इति वा । आर्चासुपूजनार्थासुचित्रकर्मध्वजेषु चेति पाठाद्वा तस्य लुक् । एतस्याञन्तस्य बहुषु वृत्तेर्लुक्प्रसङ्गात् । तस्मादञ्पो बहुष्वित्येव तत्र वक्तव्यम् । प्रत्ययादर्शनस्यैव लुगादिसंज्ञाविधानात् । प्रत्ययानामेव कार्यभाक्त्वेन बहुत्वेनतेषामेव विशेषणीयत्वात् । तथाच विदा इत्यत्राञ्प्रत्ययस्यैकस्मादेवोत्पन्नतया लुङ् नस्यादिति लुग्वचनं कर्त्तव्यम् । तदुक्तम्—एकवचनस्य द्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो यूनि इति । उक्तार्थम् ।

अथोच्यते । युगपदधिकरणवचने द्वन्द्ववचनात् गर्गवत्सवाजा इत्यत्र वार्तिपदत्रयस्यार्थत्रयवाचकत्वात्प्रत्येकं तद्राजप्रत्ययानां बहुत्वार्थकत्वमस्त्येवेति द्वन्द्वे पूर्वोक्तमबहुषु लुग्वचनमनारभ्यमेवेति । तर्हि पूर्वपक्षिणापि बहुवचने परे लुगङ्गीकारात् बहुवचनं प्रत्येकस्यादपि परतोऽस्त्येवेति न तद्दोषावकाश इति समानम् ।

[१] पुस्तकान्तरे निर्देश इत्यस्याग्रे 'उक्तार्थम् इति पाठोऽधिकः ।

नच लुकि कृते कथं तदिति वाच्यम् । प्रत्ययलक्षणेन निर्वाहात् । नच नलुमताङ्गस्येति तन्निषेधः शङ्क्यः । लुमता लुप्तो यः प्रत्ययस्तस्मिन् यदङ्गं तस्य यत्कार्यं अङ्गाधिकारविहितं तद्बहिर्भूतं वा तन्न भवतीति तद्व्याख्यानात् । लुक्च प्रत्ययस्यैव कार्यं नतु समस्तस्याङ्गस्येति प्रत्ययलक्षणस्य सुलभत्वात् । एतेनाङ्गानतिक्रान्तोऽत्यङ्ग इत्यत्र अतिआङ्ग जस् इति स्थितेऽन्तरङ्गानपीति न्यायेन लुकि पूर्वं कृते बहुवचनपरत्वाभावात्तद्राजलोपो न स्यात् ।

नन्वेवं पञ्चभिर्गार्गीभिः क्रीतः पटः पञ्चगार्ग्यो दशगार्ग्य इत्यत्रातिप्रसङ्गः । क्रीतार्थस्यार्हीयस्य ठकोऽध्यर्धेति लुक् । लुक्तद्धितलुकीति स्त्रीप्रत्ययस्य लुक् । तत्र यञ्लुकोऽङ्गकार्यत्वाभावादुक्तरीत्या प्रत्ययलक्षणप्रवृत्त्याभिसमाश्रित्य यञञोश्चेति लुक्प्रसङ्गात् पञ्चगर्गो दशगर्ग इत्यस्यापत्तेः । नचास्त्रियामिति निर्वाहः । वर्तिपदार्थस्यार्थान्तरेऽर्थे पुंसि संक्रान्तत्वादिति चेत् । न । इष्टापत्तेः । गर्गेभ्य आगतं गर्गरूप्यं गर्गमयमित्यत्र लौकिकविग्रहे सुबन्तप्रयोगेऽपि प्रातिपदिकादेव प्रत्ययोत्पत्त्या बहुवचनपरत्वाभावाल्लुङ् न स्यादित्यपि परास्तम् । समर्थानां प्रथमाद्वेत्यधिकारात्सुबन्तेनैव सामर्थ्यात् । सुबन्तस्यैव द्वितीयस्य सम्बन्धात् । प्रातिपदिकाधिकारस्य तु वृद्धादिविशेषणार्थत्वात् ।

नन्वेवं विदानामपत्यं बैदः वैदौ इत्यत्र लुक् स्यादिति सिद्धान्तिनं प्रतिउक्तापत्तिर्नसङ्गच्छते । उक्तरीत्या बहुवचनपरत्वेन पूर्वपक्षिणाप्यलुको वक्तव्यत्वात् । यदि त्वचीत्यनेनैव निषेधः । वर्णाश्रये इति निषेधस्य वर्णरूपाश्रयकार्यनिषेधकत्वेन प्रत्ययस्यासाधारणं यद्रूपं तत्त्वेन यत्र निमित्तत्वं तद्विषयकत्वाभावात् । अतएव गोहितमित्यादावत्वादेशादयो न भवन्ति । अच्त्वस्य प्रत्ययाप्रत्ययसाधारण्येन वर्णाश्रयत्वात् । अतृणोदित्यत्रेमाग-

मस्तु तिपो लुप्तत्वेऽपि प्रत्ययलक्षणेन भवत्येव । तस्य हलादि-पित्सार्वधातुकाश्रयत्वात् । सार्वधातुकत्वस्य प्रत्ययत्वव्याप्यत्वात् । एवं लुक्लोऽपि अजादिप्रत्ययाश्रयत्वेन वर्णाश्रयत्वाभावादित्युच्यते तदपि तुल्यम् । अथवाऽविशेषेणालुकं विधाय हलिनेति निषेधो वक्तव्यः । तेन गर्गरूप्यमित्यादौ नदोषः । नचैवं विदानामपत्यं बहवो माणवका इत्यत्रापि अलुक्स्यादिति वाच्यम् । अपत्याधिकारादन्यत्र लौकिकस्यापत्यमात्रस्य गोत्रस्य ग्रहणात् । युवबहुत्वे वर्तमानस्यैव यञञोश्चेति लुक्सम्भवात् । नच तत्राप्यलुक्प्रवृत्तिः स्यादिति वाच्यम् । समर्थानांप्रथमादित्यस्यानुवृत्त्या समर्थानां प्रथमस्य गोत्रप्रत्ययस्यालुग्भवति इति व्याख्यानात् । प्राथमकल्पिके प्रत्ययार्थे वर्तमानस्य तस्य प्राथम्यं यथा गार्गीया इत्यादौ । प्रकृतेतु युवप्रत्ययस्य लुकि कृते गोत्रप्रत्ययान्तस्य वैदशब्दस्य युवलक्षणं द्वितीयमर्थमुपसंक्रान्तत्वान्नप्राथम्यमिति पुनरलुग्विध्यप्रवृत्तेः । इदंचावश्यमभ्युपगम्यम् । आत्रिभरद्वाजिका, वसिष्ठकश्यपिका, भृग्वाङ्गरसिका, कुत्सकुशिकिका, अत्रेरपत्यानीति 'इतश्चानिञ' इति ढक् । भरद्वाजस्यापत्यानि । विदादित्वादञ् । उभाभ्यां युवबहुत्वेऽत इञ् । तस्य ण्यक्षत्रियार्षेति लुक् । आत्रिभृगु कुत्सेतिढको लुक् । यञञोश्चेति अञो लुक् । आत्रिभरद्वाजानां मैथुनिकेति द्वन्द्वादुबुन् वैरमैथुनिकयोरिति बुन् । कश्यपकुत्साभ्यामञ् । वसिष्ठादिभ्य ऋष्यण् ।

यदि द्वितीयमर्थमुपसंक्रान्तस्याप्यलुक् स्यात्तदा गोत्रेऽलुगचीति यथाश्रुतन्यासेऽपि अलुक् दुर्वारः स्यात् । यद्वा गर्गभार्गविकाग्रहणं नियमार्थम् । गर्गादिभ्यो यञ् । तस्य लुक् । भृगुशब्दादृष्यण् । तदन्ताद्यूनि यञ् । तस्य लुक् । गर्गभृगूणां मैथुनिकेति बुन् । अत्रात्रिभृगुकुत्सेत्यादिना लुक् प्राप्तो गोपवनादि

पाठेन प्रतिषिध्यते । यदिच द्वितीयमर्थमुपसंक्रान्तस्याप्यलुक् स्यात्तदा गोपवनादिषु गर्गभार्गवित्रिकापाठो व्यर्थः स्यात्। अतो द्वितीयमर्थमुपसंक्रान्तस्यालुग्विधिर्नप्रवर्तते इति तेन ज्ञाप्यते इति नकोऽपि दोष इति कल्प्यते । इदमपि समानम् । यदप्युक्तं वैदस्य वैदयोर्वाऽपत्यं बहवो माणवका विदाः । अत्राञो बहुप्रकृतिकत्वाभावाल्लुक्न स्यादिति । तदप्यसत् । अञन्तंयद्बहुष्वस्ति व्याख्यानेन तत्सम्भवात् । नच काश्यपप्रतिकृतयः काश्यपाइत्यत्र दोषः । अपत्यबहुत्वे वर्तमानस्यैवअञन्तस्य तत्रग्रहणात् । प्रतिकृतिबहुत्ववृत्तेः काश्यपाइत्यञन्तस्य लुगप्रसक्तेः लोपप्रतियोगिपक्षयार्थत्वेन साजात्यविवक्षयोक्तार्थलाभात् । गोत्रयूनोरपत्यत्वेन साजात्यसत्त्वात् । प्रतिकृतेश्च तदभावात् । तस्मात्सिद्धान्तेऽपि नगौरवम् । इति चेत्सत्यम् । तथापि पूर्वपक्षेऽपि दोषस्यानुपन्यासादिति प्राप्ते—

सिद्धान्तमाह भाष्यकारः । बहूवचने परतो लुगित्युच्यमाने अत्रय इत्यत्र दोषः । तथाहि—अत्रिशब्दादितश्चानिञ इति ढक् । कित इत्यन्तोदात्तत्वम् । तत्र जसि परतो लुकिक्रियमाणेऽनुदात्तस्य च यत्रोदात्तलोप इत्युदात्तनिवृत्तिस्वरेण जस उदात्तत्वं स्यात् । अर्थपक्षेतु लुकः परानिमित्तत्वाभावान्न तत्प्रसङ्ग इति जसोऽनुदात्तौ सुप्पितौ इत्यनुदात्तत्वमेव । आंग्यः स्त्रिय इत्यादिवारणाय त्वस्त्रियामिति कृतमेवेति दिक् ।

अथास्त्रियामिति पर्युदासः, प्रसज्यप्रतिषेधो वा आद्ये गार्गीच वात्स्यश्च वाज्यश्चेति द्वन्द्वे सर्वेषां लुक् स्यात् । एकैकस्य शब्दरूपस्य स्त्रीपुंसात्मकसमुदायाभिधायित्वात् । अन्त्ये तु नेति स्पष्टमेवेति चेदत्रापि भाष्यम् । देवा ज्ञातुमर्हन्तीति । देवा दिव्यदृशः पण्डिता इति यावत् । तत्रद्वेधा कैयटेन व्याख्यातम् ।

पर्युदासस्यैकवाक्यतया लाघवान्न्याय्यत्वमिति केचिदाहुः। अन्ये तु गार्गीशब्देन स्त्रीत्वप्रयुक्तानामर्थानामभिधानाद्यञोलुका नभाव्यम्। अन्येषां तु भाव्यमित्याहुः।

अथ यत्र लोपभाजां तद्रहितानां चममासस्तत्रलोपप्रतियोगिप्रत्ययान्तपदस्य बव्हर्थत्वाल्लोपः, उत तेनैवेतिवचनात् नलोपः। [१]अविद्यमानसन्निधिकृतत्वात् बहुत्वस्य तन्मात्रकृतत्वाभावाादिति चेत्। अत्रापि भाष्यम्। उभयथापीति ज्ञापकसद्भावात्। भृगुवत्साग्रायणेषु, अगार्ग्यगालवानामिति च प्रयोगदर्शनात्। आद्ये हि द्वौ लोपिनौ। आग्रायणस्तु नडादिफगन्तत्वात्तद्राजसंज्ञानास्तीत्यलोपी द्वयोश्च लुक् कृतः। अन्त्येतु द्वौ लोपिनौ। गालवस्तु ऋष्यणन्तः पूर्ववन्न लोपी। नच लोपिनो लोपः कृत इति तथाच ज्ञापकद्वयसद्भावादुभयमप्युपपन्नमिति भावः।

यस्कादिभ्योगोत्रे ॥६३॥

एभ्यः परस्य गोत्रप्रत्ययस्य लुक् स्यात् तत्कृते बहुत्वे नतु स्त्रियाम्। गोत्रे कुञादिभ्यश्चफञ् इति गोत्रप्रत्ययप्रकरणं तस्मादन्यत्र लौकिकगोत्रग्रहणम्। अपत्याधिकारे गोत्रग्रहणसामर्थ्यादेव पारिभाषिकगोत्रग्रहणम्। यस्काः। लह्वाः। बहुषुकिम्। यास्कः। लाह्वः। स्त्रियांतु यास्क्यः स्त्रियः। गोत्रेकिम्। यास्काः छात्राः। यस्क लह्व द्रुह्व अयस्थूण तृणकर्ण एते पञ्च शिवादौ इष्यण्। सदामत्त कम्बलभार अहिर्योग कर्णाटक पिण्डीजङ्घ बकसक्थ एभ्यः षड्भ्य इञ्। विश्रि कदू अजबस्ति मित्रयु एभ्यश्चतुर्भ्यः शुभ्रादित्वाद्ढक्। रक्षोमुख जङ्घारथ मन्थक उत्कांस कटुक पुष्करसत् वेषपुर परिमेखल कोष्टुमाय क्रोष्टुमान क्रोष्टुपाद शीर्षमाय

[१] अलुप्यमानसंनिधिकृतत्वात्। इति पाठान्तरम्।

एभ्यो द्वादशभ्य इञ् । यद्यपि तौल्वल्यादौ इञः प्राचामिति प्राप्तस्य लुक् प्रतिषेधाय पठितस्य पुष्करसदित्यस्य प्राच्यत्वे विवादाभावात् । बह्वच इञः प्राच्यभरतेष्वित्येव लुक्सिद्धः । तथापि गोपवनादिप्रतिषेधबाधाय तस्य यस्कादिषु पाठः । तत्र तौल्वल्यादय इत्यस्य कौश्चित्पठ्यमानत्वात । यैस्तु तत्र नपठ्यतेतैरप्यस्मादेवज्ञापकात्तौल्वल्यादिप्रकृतिभूतानां तुल्वलेत्यादीनां गोपवनाद्यन्तर्भावस्यानुमेयत्वात् । खरपद अस्य नडादित्वात्फक् । पदक पर्यक आभ्यामत इञ् । भलन्दन अम्माच्छिवादित्वादण् । भण्डिल भण्डिक भण्डिव भण्डित एभ्यश्चतुर्भ्योऽश्वादित्वात्फञ् ।

यञञोश्च ॥ ६४ ॥

गोत्रे यद्यञन्तमञन्तंच तदवयवयोरेतयोर्लुक् तत्कृते बहुत्वेनतु स्त्रियाम् । गर्गाः । वत्साः । गर्गादिभ्यो यञो लुक् । विदाः । ऊर्वाः । विदाद्यञो लुक् । तत्कृतेति किम् । प्रियगार्ग्याः अन्यपदार्थकृतमिह बहुत्वम् । अस्त्रियां किम् । गार्ग्यः स्त्रियः । गोत्रेकिम् । द्वैप्याः । द्वीपादनुसमुद्रं यञ् । औत्साः । उत्सादिभ्योऽञ् । प्रवराध्यायप्रसिद्धमिहगोत्रम् । नेह । पौत्रदौहित्राः । तद्राजसंज्ञारहितानां लुगर्थमेतदारभ्यते ।

यञादीनामेकस्य द्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानम् । आदिपदेन वक्ष्यमाणानामपि बहुत्वे लुग्भाजामुपग्रहः । आदिशब्दस्य व्यवस्थापरत्वात् । गार्ग्यस्य गार्ग्ययोर्वाकुलं गार्ग्यकुलं गर्गकुलंवा । वैदस्य वैदयोर्वा कुलं वैदकुलं विदकुलं वा । यञादीनां किम् । आङ्गकुलादौ माभूत् । संख्याविशेषग्रहणं किम् । गर्गाणां कुलं गर्गकुलम् । परत्वाद्विकल्पो माभूत् । तत्पु-

रुषेतिकिम् । गार्ग्यस्य समीपमुपगार्ग्यम् । षष्ठ्याः किम् । शोभनगार्ग्यः । कर्मधारये माभूत् ।

अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च ॥ ६५ ॥

बहुत्वे गोत्रप्रत्ययस्य लुक् स्यात् । अत्रयः । भृगवः । कुत्साः । वसिष्ठाः । गोतमाः । अङ्गिरसः । यथात्वाङ्गिरसः पूर्वे भृगवश्चापसेधिरे । अत्रयश्च वसिष्ठाश्च तथेतस्त्वापसेधिमेति आथर्वणश्रुतिः । तेनैवेत्येव प्रियात्रेयाः । अस्त्रियामित्येव । आत्रेय्यः स्त्रियः ।

बह्वच इञः प्राच्यभरतेषु ६६

प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्य बह्वच्प्रकृतिकस्य इञो बहुत्वे लुक् । पन्नागाराः । मन्थरैषणाः । युधिष्ठिराः । अर्जुनाः । बह्वचः किम् । चैकयः । पौषयः । प्राच्यभरतेषु किम् । बालाकयः । हास्तिदासयः । इह कर्मधारये प्राच्यग्रहणं व्यर्थम् । व्यावर्त्याभावात् । द्वन्द्वे तु अन्यत्र भरतानामभावात् । प्राच्यग्रहणेनैव सिद्धिः ।

यद्यपि सामान्यविशेषयोर्वाचनिको द्वन्द्वनिषेधः तथापि सौत्रत्वादेव तत्संभवः । एवं चान्यत्र प्राच्यग्रहणे भरतग्रहणं नभवतीति ज्ञापनाय भरतानां पृथङ् निर्देशः । तेनेञः प्राचामित्यत्र भरतगोत्रग्रहणं न । औद्दालकिः पिता । औद्दालकायनः पुत्रः ।

न गोपवनादिभ्यः॥ ६७ ॥

गोत्रप्रत्ययस्य न लुक्। गौपवनाः । शैग्रवाः । विदाद्यन्तर्गणो गोपवनादिः । तत्समाप्तये मध्ये वृत्करणाभावात् । आगणान्ताद् ग्रहणे प्राप्ते गोपवनादिप्रतिषेधः प्राग्घरितादिभ्य इति वाच्यम् । तेन हारिता इत्यत्रालुगेव ॥

तिककितवादिभ्यो द्वन्द्वे ॥६८॥

एभ्यो गोत्रप्रत्ययस्य बहुषुलुक्द्वन्द्वे । तैकायनयश्च कैतवायनयश्च तिककितवाः । तिकादिभ्यः फिञो लुक् । नच गणे द्वन्द्वरूपाणामेव पाठात्तिकादिभ्य इत्येवोच्यतामिति वाच्यम् । द्वन्द्वे पूर्वपदानामेव प्रत्ययस्य लुक् नतूत्तरपदानामिति शङ्कानिवृत्त्यर्थत्वात् । वाङ्गरयश्च भाण्डीरथयश्च वङ्गरभण्डीरथाः । अत इञो लुक् । औपकायनाश्च लामकायनाश्च उपकलमकाः । नडादिफको लुक् । माढकयश्च नारकयश्च मढकनरकाः । अत इञो लुक् । वाकनखयश्च श्वागुरपरिणद्धयश्च वकनखश्वगुरपरिणद्धाः । औब्जयश्च काकुभाश्च उब्जककुभाः । अत इञ्शिवाद्यणोर्यथाक्रमं लुक् । लाङ्कयश्च शान्तमुखयश्च लङ्कशान्तमुखाः । अतइञोलुक् । (१)औरगयश्च शालङ्कयश्च उरगशालङ्कयः । तिकादिफिञतइञोलुक् काष्णाजिनयश्च कार्ष्णसुन्दरयश्च कृष्णाजिनकृष्णसुन्दराः । अतइञोलुक् । आग्नि वेश्याश्च दाशेरकयश्चाग्निवेशदाशेरकाः । गर्गादियञोऽतइञश्च लुक् । भ्राष्ट्रकयश्च कापिष्ठलयश्च भ्राष्ट्रककापिष्ठलाः । अतइञो लुक् ॥

---

[१] औरगायनयश्चेतिपाठः साधुः

उपकादिभ्योऽन्यतरस्यामद्वन्द्वे॥

एभ्यो गोत्रप्रत्ययस्य बहुत्वे वा लुक् द्वन्द्वेऽद्वन्द्वे च। अद्वन्द्व पदस्य द्वन्द्वानुवृत्त्यभावज्ञापकत्वात्। एषां मध्ये त्रयो द्वन्द्वास्तिककितवादिषु पठ्यन्ते इति वृत्तिः। कैयटस्तु भ्राष्ट्रकि कापिष्ठलि इति द्वन्द्वस्य तिककितवादिषु पाठोऽनार्षः। भ्राष्ट्रककापिष्ठलाः। भ्राष्ट्रककापिष्ठलयः इति भाष्योदाहरणादित्याह। तस्मात्कृष्णाजिनकृष्णसुन्दराः अनयोः पूर्वेण द्वन्द्वे नित्यो लुक्। अद्वन्द्वे विकल्पः। उपका औपकायनाः। लमका लामकायनाः। कृष्णाजिनाः कार्ष्णाजिनयः। कृष्णसुन्दराः कार्ष्णसुन्दरयः। अन्येषां तु द्वन्द्वे तदभावे वा विकल्पेन लुक्। भ्राष्ट्रकाः। भ्राष्ट्रकयः। कापिष्ठलाः। कापिष्ठलयः। वडारक अडारक भ्रटुक अकन्धक पिङ्गलक पिष्ट सुपिष्ट मयूरकर्ण खरिजङ्घ शवापण पतञ्जल कावेरिणि गडु उपितक कुश कुत्स निदाघ कलशीलकण्ठ कामकण्ठ कृष्णपिङ्गलकर्ण पर्णक जाटिलक बधिरक जन्तुक अनुलोम प्रतिलोम अविदग्ध प्रतान अनभिहित॥

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्॥ ७०॥

एतदवयवस्याणो यञश्च गोत्रप्रत्ययस्य बहुषु लुक्। प्रकृतिभागस्य यथाक्रमं उक्तावादेशौ च स्याताम्। अगस्तयः कुण्डिनाः ननु द्वयोर्विशिष्टयोरेवादेशद्वयं यथाक्रमं विधीयतां किं प्रत्यय लोपं विधाय प्रकृतिभागस्यादेशकरणेनेति चेत् न, आगस्तीया इत्यस्यासिद्धिप्रसङ्गात्। अगस्त्यादृष्यणि आगस्त्यः। अग-

स्तीनां छात्रा इति प्राग्दीव्यतीयेऽजादौ प्रत्यये विवक्षितेऽप्यगस्तीत्यादेशापत्त्या वृद्धत्वाभावाच्छो न स्यात् । लुकं कृत्वाऽगस्तीत्यादेशविधाने तु तत्र गोत्रेऽलुगचीति लुकप्रतिषेधात् । तत्संनियोगशिष्ट आदेशोपि नभवति इति वृद्धत्वाच्छप्रसङ्गे मूर्खतिष्यागस्त्येति यलोपे चक्रुते आगस्तीयाइति सिद्धम् । कौण्डन्येतु उभयथापि न विशेषः । कौण्डन्यशब्दात्कण्वादिभ्योगोत्र इत्यणि कृते आपत्यस्येति यलोपेच कौण्डिनाः छात्राइत्येवसिद्धेः । चकारः स्वरार्थः । कुण्डिनीशब्दस्येनिप्रत्यये मधोदात्तत्वात् । गर्गादिभ्यो यञ् । भस्यादेरिति पुंवद्भावे नस्तद्धिते इति टिलोपे कौण्डन्य इति स्यात् अस्यादेव निपातनान्न पुंवत् । यस्येतिचेतीकारलोपः । वस्तुतष्टिलोपाभावमात्रं निपात्यम् ।

सुपोधातुप्रातिपदिकयोः ॥७१॥

एतयोरवयवस्यसुपो लुक् । पुत्रमात्मन इच्छति पुत्रीयति । सनाद्यन्ता इति प्रत्ययविशिष्टस्य धातुसंज्ञायां पुत्रपदोत्तराद्द्वितीयाया लुक् । सुबन्तात्क्यच् । राज्ञः पुरुषो राजपुरुषः ॥

अदिप्रभृतिभ्यः शपः ॥७२॥

एभ्यः शपो लुक् । अत्ति । योन्यदेवमुपासते इत्यादौ आसतेरादानार्थे रूपम् । आश्वसेयुर्निशाचराः । न विश्वसेदविश्वस्ते इत्यादौ गणकार्यस्यानित्यत्वान्न लुक् । घटादयः षित इत्येव सिद्धे क्षमूष् इति षित्करणेन ज्ञापितत्वादिति केचित् । पचाद्यजन्तादाचारकिवित्यन्ये । एतेन पथिकवनिता प्रत्ययादाश्वसन्ति इति मेघदूतं, देवीगिरां दीर्घतरं श्वसन्तीति भानुदत्तप्रयोगश्च व्याख्यातः ॥

बहुलं छन्दसि ॥७३॥

बहुलं शपो लुक् । वृहं हनति वृत्रहा । अहिः शयते । बहुलोक्तेरन्यत्रापि । त्राध्वं नो देवाः ॥

यङोऽचि च ॥७४॥

अच्प्रत्ययेपरे यङो लुक् । लोलुवः । पोपुवः । पचाद्यच् । इदमेव ज्ञापयति सर्वे धातवः पचाद्यन्तःपातिन इति । चकारादन्यत्रापि बहुलम् । वेभिदीति । चेच्छदीति । अत्राच्प्रत्ययनिमित्तको लुक् परनिमित्तकः चकारलभ्यस्त्वनैमित्तिक इति विवेकः । अत्र भाष्यमते छन्दसीत्यस्यानुवृत्तिः नतु वृत्तिमते । हुश्नुवोरित्यत्र सार्वधातुकग्रहणेन क्वचिद्भाषायामपि यङ्लुको भाष्यकारेणापि स्वीकारात् । पूर्वप्रयोगानुसारेणैव प्रयोगव्यवस्थासंभवात्

नन्वत्राजिति प्रत्याहारः एव गृह्यतामिति चेत् । अत्राहुः । तथासत्यणीत्येवावक्ष्यत् । यङन्तादन्यस्याचोऽसंभवात् । नच पापच्यै इत्यत्र तत्संभवः । शपा व्यवधानात् । एकादेशस्य स्थानिबद्धावात् । लिटस्तझयोरेशित्वाम आवश्यकत्वात् । अमन्त्र इतिवचनान्मन्त्रे कथञ्चित्तत्संभवे तु यङा प्रत्ययेन साहचर्यात् ॥

जुहोत्यादिभ्यः श्लुः ॥७५॥

मण्डूकप्लुत्या शपोऽनुवृत्तिर्नतुसन्निहितस्यापि यङः श्लाविति द्वित्वविधानसामर्थ्यात् । अन्यथा सन्यङो रित्यनेनैव सिद्धेः ॥

बहुलं छन्दसि ॥७६॥

शप श्लुः स्यात्। जुहोत्यादिभ्योऽपिक्वचिन्न। देवतानो स्वस्ति मघवा धात्विन्द्रः। दाति प्रियाणि। अन्यस्मादपि। पूर्णां विवष्टि। जनिमाविवक्ति॥

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु॥ ७७॥

एभ्यः सिचो लुक् परस्मैपदेषु। लुगेवानुवर्तते नतु श्लुः। व्याख्यानात्। गादेशस्यस्थितिपि शब्लुकानिर्देशात्। इणादेशो गा अत्र गृह्यते नतुगै इत्यादिः। अतएवगामादाग्रहणेष्वविशेष इत्यस्य न प्रवृत्तिः। अन्यव्यावृत्तरूपेणैवोपादानात्। गादेशस्य लुङ्मात्रविषयकत्वेऽप्यनुकरणेऽपि प्रकृतिवदित्यतिदेशेन शपो लुक्प्रवृत्तेः। अगात्। अस्थात्। अदात्। अधात्। पिबतेरेवग्रहणं नतु पातेः। लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणात्। अपात्। अभूत्। अस्त्यादेशस्यापीदं रूपम्। आर्धधातुकमात्रविषयकस्यतस्य शपो लुक्सम्बन्धाभावेन लुग्विकरणपरिभाषाया अप्रवृत्तेः। गैशब्द इत्यस्य त्वगासीत्, पारक्षणे अपासीत्। यमरमनमातामितीट्सकौ। पैशोषणे इत्यस्यापि नसंग्रहः लाक्षणिकत्वात्। परस्मैपदे किम्। अगासातां ग्रामौ देवदत्तेन।

अत्रभूभ्य इतिभीघातोर्ङसानिर्देशः। एरनेकाचइति यण्। तेन माभेः शशाङ्कसमसीधुनि नास्ति राहुरिति सिद्धमिति कल्पनमनादेयम्। मास्मभैषीस्त्वयाद्यैव इतिभट्टिविरोधात्। माभेर्मासं विक्था इति तु छान्दसम्। माभेरिति तु प्रामादिकमित्याहुः। आगमशासनस्यानित्यत्वादीडभावे वा समाधेयम्॥

विभाषा घ्राधेट्शाच्छासः॥७८॥

पूर्वविषये वा लुक्। घेटः पूर्वेण प्राप्ते इत्वेनेत्वप्राप्ते विकल्पः। अघ्रात्। अधात् अशात्। अच्छात्। असात्। शोछो तनूकरणे पोऽन्तकर्मणि। पक्षे अघ्रासीदित्यादि। परस्मैपदे किम। अघ्रासत सुमनसो देवदत्तेन। कर्मणिलङ्।

तनादिभ्यस्तथासोः ॥ ७९ ॥

सिचो वालुक् तथासोः परतः। थासासाहचर्यादेकवचनस्य तस्य ग्रहणम्। अतत। अतथाः। अतनिष्ट। अतनिष्टाः। असात असाथाः। जनसनेत्यात्वम्। पक्षेऽसनिष्ट असनिष्टाः। यूयमतनिष्टेत्यत्र न लुक्। बहुवचनस्यात्रानुपादानात्।

मन्त्रे घसह्वरणशवृदहाद्वृ-चकृगमिजनिभ्यो लेः॥८०॥

एभ्यो लेर्लुक् मन्त्रे। अक्षन् पितरोमीमदन्त पितरः। घस्लादेशेगमहनेत्युपधालोपः। शासिवसीति षत्वम्। अडभावे मात्वा वृकासो अशिवास उक्षन्। हृवृकौटिल्ये इत्यस्य गुणविशिष्टस्य निर्देशः। अकारउच्चारणार्थः। माह्वर्मित्रस्य। धूर्तिः प्रणङ् मर्त्यस्य। नशेर्वेति कुत्वम्। वृइति वृङ्वृञोर्ग्रहणम्। सुरुचो वेन आवः। गानआधक्। दादेर्धातोरिति घत्वम्। एका च इति भष्भावः। आदिति आकारान्तग्रहः। आप्राद्यावापृथिवी अन्तरिक्षम्। वृजुवर्जने। भारोअस्मिन् महाधने परावर्क्। परावग्भारमृच्यथा। अक्रन् कर्म कर्मकृतः। आग्मन्। मन्त्रपदं

ब्राह्मणस्याप्युपलक्षणम् । अत्तत वा अस्य दन्ताः । ऐतरेय ब्राह्मणे हरिश्चन्द्रं प्रतिवरुणस्योक्तिः ।

लिग्रहणमादिः सिचोऽन्यतरस्यामिति स्वरस्यापवृत्त्यर्थम् । अन्यथासिचमेवान्ववर्तिष्यादितिकैयटहरदत्तादयः । नचलिङ्लिटोरपि लोपापत्तिः । सिचः स्थानिभूतो योलिः इति व्याख्यानात् । केचित्तु विभाषेत्यनुवर्तते । न ता अगृभ्णन्नजनिष्टहिप इत्याद्यनुरोधात् । तेन सिजनुवृत्त्यादिकमपि अफलम् । नचलिङ्लटोर्लुगापत्तिः । छन्दसि रूपान्तरस्यानापाद्यत्वादित्याहुः ।

आमः ॥८१॥

इजादेश्चेत्यादिनाम् वक्ष्यते । ततः परस्य लुक् । ईहांचक्रे । तिबाद्यादेशापवादत्वाल्लावस्थायामेवायम् । तेन चक्षुः कामं याजयांचकारेत्यादावामन्तस्यातिङन्तत्वादनिघातः । अनुप्रयुज्यमानस्य च निघातः । आमन्तस्य सुबन्तत्वात्पदत्वम् । कुन्मेजन्त इत्यव्ययत्वात्सुपोलोपः । कृदतिङित्यत्र तिङ्भाविन एवलकारस्य कृत्संज्ञानिषेधात् । नचैवं यत्यकारर्षीत्यकारेत्यत्र तिबादिलुकि सति गतिर्गतौ तिङिचोदात्तवतीति प्रशब्दस्य निघातो नस्यात् । आमन्तस्य तिङन्तत्वाभावादिति वाच्यम् । प्रशब्दस्य कारयामित्यनेन समासे समासस्वरेणान्तोदात्तेऽव्ययपूर्वपदप्रकृतिस्वरेण चादयुदात्ते प्राप्ते तद्भावेन कृत्स्वरे कृते शेषनिघातेनैव प्रशब्दानुदात्तत्वसिद्धेः । नच नकारर्षीत्यकारेत्यादौ सुबन्तत्वेन नञ्समासापत्तिः । ततश्च नकारलोपापत्तिरिति वाच्यम् । अनभिव्यक्तार्थेनामन्तेन सह सामर्थ्याभावात् ।

आमोलेर्लोपेलुङ्लोटोरुपसंख्यानम् । तां वैजवापयोर्विदामक्रन् । अस्य भवन्तो विदाङ्कुर्वन्तु । लिग्रहणानुवृत्त्याऽन्यत्र

नप्राप्नोतीत्यारम्भः । अनुप्रयोगवचनसामर्थ्यात्प्रत्ययमात्रलोपस्येष्टत्वात् तदनुवृत्तिर्नेतिभाष्यम् । तत्रनिपातनेनापि लुक्सिद्धिरितिकैयटः । आमन्तस्यानभिव्यक्तपदार्थत्वात्स्वाभाविकयेव तरबादेरनुत्पत्तिर्लुगुद्धारेणान्वाख्यायते ॥

अव्ययादाप्सुपः ॥८२॥

अव्ययाद्विहितस्यापः सुपश्च लुक् । तत्र शालायाम् । अथ तत्र वार्तिकम् । अव्ययादापो लुग्वचनानर्थक्यं लिङ्गाभावादिति । नच स्त्रीसमानाधिकरणत्वात्तदापत्तिः । भूतामियंब्राह्मणीत्यत्रातिप्रसङ्गात् । यद्यपि एकत्वे सुः इत्याद्येकवाक्यत्वे सुबुत्पत्तिर्नप्राप्नोति । अव्ययानां संख्याराहित्यात् । तथाप्यविशेषेणस्वाद्युत्पत्तौ द्व्येकयोरित्यादिर्नियमविधिः । यद्वाऽस्मादेव ज्ञापकात्सुबुत्पत्तिः । तेनप्रत्ययलक्षणेन पदत्वाद्धुत्वादिसिद्धिः । अतएव घटो नेत्यादौ शङ्खः पाण्डुर इत्यादौच निपातोत्तरविभक्तीनां प्रतियोगित्वादौ लक्षणेति तार्किकसंप्रदायः ॥

नाव्ययीभावादतोऽत्वप-
ञ्चम्याः ॥८३॥

अत्र योगविभागः । अदन्ताद्व्ययीभावात्सुपो लुङ् न ततोऽस्त्वपञ्चम्याः । पञ्चमी भिन्नस्यामादेशश्च । अलुक् सर्वविभक्तिसाधारणःअम्भावस्तु पञ्चमीभिन्नस्यैवेति फलितम् । अन्यथा पञ्चम्यां अम इवालुकोऽपि प्रवृत्त्यापत्तेः । यद्वा तुशब्दोऽवधारणार्थः । तथाचापञ्चम्या अमेव लुक् तु तस्या अपीत्येकवाक्यतायामपि तदर्थसिद्धिः । दिशयोर्मध्यमपादेशम् ।

पञ्चमीप्रतिषेधेऽपादानपञ्चम्या ग्रहणम् । नेह आपाटलिपुत्रं वृष्टो देवः । कर्मप्रवचनीययोगेऽत्र पञ्चमी । यद्वाऽव्ययीभावाद्विहितायाः पञ्चम्या अमादेशनिषेधः । अत्रतूत्तरपदाद्विहिता सा । तस्याश्च समासावयवत्वात्तस्यच प्रातिपदिकत्वाल्लुकि कृते समासात्सुशब्दे उत्पन्ने तस्या अम्भावः । यदातु समासाद्विहिता पञ्चमी तदा श्रूयते एव । आउपकुम्भात । कुम्भस्यसमीपमित्यव्ययीभावः । तत आङ्योगे पञ्चमी ॥

तृतीया सप्तम्योर्बहुलम् ॥८४॥

अम्भावः स्यात् । उपदिशम् । उपादेशेन । उपदिशे एतेन 'प्रतिहट्टपथे घरट्टजादि'ति नैषधं (१)व्याख्यातम् । सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो निस्सामिति वाच्यम् । बहुलग्रहणसिद्ध्यर्थकथनमेतत् । ऋद्धिः—सुमद्रम् । सुमगधम् । नदीसमासः—उन्मत्तगङ्गम् । लोहितगङ्गम् । संख्या—एकविंशतिभारद्वाजम् त्रिपञ्चाशद्गौतमम् । एकविंशतिभिरद्वाजाः । त्रिपञ्चाशद्गौतमवंश्याः इति संख्यावंश्येनेति समासः । वार्तिपदानां स्वार्थविशिष्टार्थान्तराभिधायित्वाद्गौतमभारद्वाजशब्दयोरेकत्वविशिष्टयोरेकत्वविशिष्टेऽर्थान्तरे संक्रमात्तद्राजस्येति लुगभाव इति कैयटः । वृत्तिप्रवेशात्सागेव गर्गाणां कुलं गर्गकुलमित्यादिवल्लोपप्रसङ्गाद्वाक्यप्रयोगादेव नलोप इति दीक्षिताः । ततः सप्तमी । नित्योऽम्भावः ।

लुटः प्रथमस्य डारौरसः ॥८५॥

लुडादेशस्य प्रथमपुरुषस्य एते आदेशाः स्युः । नच टेरेत्व-

(१) नैषधीयचरिते द्वितीयसर्गे पञ्चाशीतितमोऽयं श्लोकः ।

मात्मनेपदे परत्वात्स्यादिति वाच्यम्। पुनः प्रसङ्गविज्ञानेन तत्तदुत्तरमेवोक्तादेशानां प्रवृत्तेः। ईजतुरित्यादौ संप्रसारणे कृते द्वित्ववत्।

ननु स्थानिनः षट् आदेशास्तु त्रयः अतो यथासंख्येन कथं निर्वाह इति चेत्। न, अर्थत आन्तर्येण व्यवस्थासंभवात्। यद्वा डारौरसश्च डारौरसश्चेत्येकशेषाश्रयणात्,कृतैकशेषाणां द्वन्द्वे तु एकवचनद्विवचनयोर्डा, बहुवचनैकवचनयो रौ,द्विवचनबहुवचनयोश्च रसादेशः स्यात्। कृतद्वन्द्वानामेकशेषे तु तिप्तसझिनां डारौरसः क्रमेण। तआनांश्च इत्येषां डारौरस इतीष्टसिद्धिः। अयमर्थो भाष्ये—

डारौरसः कृते टेरे यथा द्वित्वप्रसारणे।
समसंख्येन नार्थोऽस्ति सिद्धं स्थानेऽर्थतोऽन्तरा॥
आन्तर्यतो व्यवस्था त्रय एवेमे भवन्ति सर्वेषाम्।
टेरेत्वंच परत्वात्कृतेऽपि तस्मिन्निमे सन्तु॥ इति।

स्यादेतत्। डादेशोऽलोन्त्यपरिभाषयाऽन्त्यमात्रस्य प्राप्नोति। नच शित्करणेन निर्वाहः सार्वधातुकत्वापत्त्या श्नः कर्तरीत्यत्र तास्यनुदात्तेदिति सूत्रेण तासेः परं लसार्वधातुकमनुदात्तमित्यस्य निघातस्यापत्तेः। तिङ्ङतिङ इति निघातस्य तु न प्रसङ्गः। नलुटीति निषेधात् इति चेत्। न, अन्त्यादेशेऽपि टिलोपेन आख्याततकारसहितस्यैव आसो निवृत्त्या रूपासिद्धेः। नचान्त्यस्य डादेशे तकारान्तं नाङ्गम्। तकारस्य प्रत्ययावयवत्वात्। प्रत्ययावधिकपूर्वभागस्यैवाङ्गसंज्ञाविधानादिति वाच्यम्। डित्वसामर्थ्याङ्गसंज्ञामङ्गसंज्ञां विनैव तत्प्रवृत्तेः। नचैवं तिङ्ग्रहणेन ग्रहणं न स्यात् रूपान्तरापत्तेरिति वाच्यम्। पचन्ति पचन्तु इत्यादिवदेकदेशविकृतस्यानन्यत्वात्।

अथवा सर्वादेशः प्रत्ययसंज्ञेत्संज्ञा लोपश्चेत्येतेषां पूर्वपूर्वसा-

पेक्षत्वादनेकाल्त्वादेष सिद्धम् । अन्तादेशत्वे हि प्रत्ययावयव एव स्यान्नतु प्रत्ययः । समुदायस्यैव तथात्वात् । तदभावे च नेत्संज्ञा । तदभावेच न लोपः । अतः पूर्वमनेकाल्त्वात्सर्वादेशः । तत इत्संज्ञादीति न क्षतिः । यद्वा अ, अ इति प्रश्लिष्टनिर्देशोऽयम् । तेनानेकाल्त्वात्सर्वादेश इति भाष्यम् ।

स्यादेतत् । तिबादीनांलसार्वधातुकानुदात्तत्वं परत्वात्प्राप्नोति । शब्दान्तरप्राप्त्याऽनुदात्तस्यादेशानां चानित्यत्वात् । तथाच तेषामुदात्तत्वं न स्यात् । इति चेत् । न, अन्तरङ्गत्वादादेशानामेव प्रथमं प्रवृत्तेः । नच तथापि तेषामनुदात्तत्वं क्रियतामुगो लोप इति वीक्षायां परत्वाट्टिलोप एव ततः पुनः प्रसङ्गविज्ञानादनुदात्तत्वमेव डादीनां स्यादिति वाच्यम् । टिलोपानन्तरं स्वरविप्रतिषेधाश्रयेण उदात्तनिवृत्तिस्वरस्यैव तास्यनुदात्तोदेश्यनुदात्तत्वं बाधित्वा प्रवृत्तेः । नतु तथात्मनेपदैकवचनस्य तस्य स्थाने योऽसादेशः तत्रपरत्वाट्टिलोपे कृते पश्चादेत्वानुदात्तत्वप्रवृत्त्याऽनुदात्तस्य च यत्रोदात्तलोप इत्यस्याप्रवृत्तेः । अनुदात्ते कृते सति तद्विशिष्टनिमित्तको यत्रोदात्तलोपस्तत्रैव तत्संभवात् विप्स्थानीयडादेशस्तु तिपः पित्त्वेनानुदात्तत्वात्स्थानिवद्भावेनानुदात्त इति तत्र स्यादेवोदात्तनिवृत्तिस्वरेणोदात्तत्वम् । तकारस्थानीयडादेशे तु तास्यनुदात्तेदित्त्वस्य प्रवृत्तिं विनानुदात्तस्यचेति स्वरस्यैवानवकाशत्वेन तयोर्विप्रतिषेधायोगादिति चेत् ।

अत्र भाष्यकाराः । लसार्वधातुकानुदात्तत्वं हि प्रत्ययस्वरस्यापवादः । नचापवादविषये उत्सर्गा अभिनिविशन्ते तथाच परत्वाट्टिलोपे कृतेऽपि अनुदात्तस्यचेति स्वरः प्रवर्तते एव । उदात्तत्वाभावमात्रस्य तत्रत्यानुदात्तशब्देन विवक्षितत्वात् । एवं स्थिते शास्त्रीयानुदात्तत्वाभावेऽपि डादेशे प्रत्ययस्वरस्य प्रवृत्तिविर-

ङेण उदात्तत्वाभावरूपानुदात्तत्वस्य सत्त्वात् उदात्तनिवृत्तिस्वरो निःप्रत्यूह एव । नचतासेरुदात्तत्वात्पूर्वमेव टिलोपप्रवृत्तेरुदात्तलोपोऽपि कथमिति वाच्यम् । बाधकाभावेन उदात्तविशिष्टस्यैवतासेः प्रवृत्तेः डादेशेतु अपवादप्रवृत्तेर्भावितया पूर्वं न प्रत्ययस्वरप्रवृत्तिरिति वैषम्यम् । तस्मात्पदद्वयेऽपि स्वरसिद्धिरिति सर्वं शिवम् ।

इति श्रीसिद्धान्त सुधानिधौ द्वितीयाध्यायस्य चतुर्थपादे द्वितीयमाह्निकम् । पादोऽध्यायश्चायं समाप्तः ।

सद्विद्वत्पदवाक्यमाननिगमाकूपारपारङ्गम-
श्रीलक्ष्मीधरलब्धबोधजनुषा विश्वेश्वरेणोदिते ।
श्रीसिद्धान्तसुधानिधौ सुधिषणैरध्यायमध्यायतं(१)
ध्यायंध्यायमिहाभिधेयमधुना शोधाय धीर्धीयताम् ॥ १ ॥

(१) अधिकमायतोऽध्यायतः अतिविस्तृत इत्यर्थः ।

अथ तृतीयोऽध्यायः

प्रत्ययः ॥ १ ॥

अधिकारोऽयम् । पञ्चमसमाप्तिपर्यन्तम् । अत्र विधीयमानाः प्रत्ययसंज्ञाः स्युः । तेन प्रकृत्यादौ नातिव्याप्तिः । अथैवमपि हनस्त च, त्रपुजतुनोः पुक् इत्यादिविकारागमेषु अतिव्याप्तिर्दुर्वारा । नच परत्वाभावात्तेषां संज्ञा न भविष्यतीति वाच्यम् । श्नम्बहुजकक्षु परत्वं विनापि प्रत्ययत्वस्वीकारादिति चेत् ।

अत्राहुः—प्रयोजनाभावान्न तेषां संज्ञेति । तथाहि—पराविधानार्थं न तेषां तत्संज्ञा । षष्ठ्यैव स्थानसंबन्धावयवसंबन्ध्यन्यतरस्य प्रतिपादितत्वात् । नाप्युदात्तत्वार्थम् । आगमानां विशिष्यानुदात्तस्वरविधानात् । विकाराणां तु निरुक्तानां स्वरस्यैव विरहात् । साच्कानां तु प्रवृत्तिकालेऽवान्तरङ्गत्वात्स्थानिस्वरप्रवृत्तेः । पञ्चमीनिर्देशाभावाच्च । नच तव्यतिरेकेणापि प्रत्ययसंज्ञाबलादेव परत्वं स्यादिति वाच्यम् । षष्ठ्यैव स्ववाक्योपात्तसंबन्धविशेषोक्तौ विरोधाद्वाक्यान्तरोपात्तपरत्वान्वयानुपपत्तेः ।

नन्वेवं गापोष्टगित्यादावानन्तर्यसंबन्धे षष्ठीविज्ञानात्प्रत्ययविज्ञानोत्पत्तावपि विकारागमस्थलेऽनुबाद्यस्य षष्ठीनिर्दिष्टत्वात् प्रत्ययविधिर्न स्यात् । पञ्चमीनिर्देशाभावात् । श्रुतयोरेवस्थान्यादेशयोरागमागामिनोश्च संबन्धप्रतिपादने वाक्यस्योपयोगात् । वाक्यान्तरस्यच संबन्धविशेषकल्पकस्याभावात् । नच हनस्तचेत्यत्र धातोरिति-त्रपुजतुनोः पुगिति चच प्रातिपदिकादिति पञ्चम्यन्तस्यानुवृत्त्या तेन प्रत्ययविधिः । श्रूयमाणेनच षष्ठ्यन्तेन स्थान्यादेशभावस्यागमागमिभावस्य च निर्वाह इति वाच्यम् । हन्तेरादेशविधावुपयोगा-

त् । विभक्तिभेदाच्च । तेनधातोर्विशेषयितुमशक्यतया हन्तेस्त-कारादेशो धातुमात्राच्च क्यप् इति वाक्यार्थप्रसङ्गात् । यद्वा हन्तेस्तो भवति धातोः क्यप् भवति कस्माद्धन्तेरिति वाक्यभेदेन हन्तिना धातुविशेषणात् । यद्वा महासंज्ञाकरणमन्वर्थत्वविधानार्थम् । तेन निरर्थकानां विकारागमानां न प्रत्ययसंज्ञा । विकारागमानांचानर्थकत्वमन्वयव्यतिरेकाभ्यां प्रकृतेरेव तदर्थत्वात् तरवादिवदर्थान्तरद्योतकत्वाभावान्निर्विवादम् । नच प्रत्ययसंज्ञासिद्धौ प्रकृत्यर्थेनैवार्थवत्त्वान्निर्वाह इति वाच्यम् अर्थवत्त्वाभावेन प्रत्ययत्वमेव नास्तीत्युक्तौ उक्तयुक्तेरन्योन्याश्रयग्रस्तत्वेनानुल्लासात् ।

अथप्रत्याययतीति कर्तृसाधनः प्रत्ययशब्दः उत प्रत्याय्यते इति कर्मसाधनः ? नाद्यः । स्वार्थिकेष्वव्याप्तेः । प्रकृत्यर्थातिरिक्तार्थविषयबोधस्य तैरजननात् । नान्त्यः । यस्यार्थः प्रकृत्या प्रत्याय्यते स प्रत्याय्यमानार्थ इति तदर्थात् । स्वार्थिकसनप्रत्यये संगृहीतेऽपि इच्छार्थकसनादावव्याप्तेः । इच्छार्थानां तषां प्रकृतिबोध्यार्थबोधकत्वादितिचेत्

उच्यते । एक एव शब्दोऽनेकशक्तियोगात्प्रवृत्तिनिमित्तद्वयावच्छिन्नोऽधिक्रियते इति यथासंभवमुभयत्र संज्ञाप्रवृत्तिः । ण्यन्तस्य निपातनादाचि णेर्लुक् । नचागमेऽप्येवं स्यादिति वाच्यम् । प्रत्ययस्यागमव्यतिरेकेणापि प्रयोगादागमस्य तु तदभावादिति प्रत्ययस्यैवान्वयव्यतिरेकाभ्यामर्थवत्त्वपर्यवसानात् ।

अनुन्यासकारस्तु प्रतियन्त्यर्थमनेनेति करणेऽच्प्रत्ययः । यद्वा पुंसि संज्ञायां घप्रत्यय इत्याह । नच ल्युटा बाधितत्वात्करणे कथमुक्तप्रत्ययौ । क्तल्युट्तुमुन्खलर्थे वासरूपविधेरभावादिति वाच्यम् । तत्र करणाधिकरणयोरित्यस्य ल्युटोऽनुपादानादिति अ-

न्यत्र विस्तरः ।

तत्सिद्धं यौगिकोऽयं प्रत्ययशब्द इति नचपक्वत्यादावतिव्याप्तिः । अधिकारविशेषविहितत्वस्य प्रयोगोपाधित्वात् तत्प्रकारकबोधाभावेनोक्तधर्मे रूढ्यवच्छेदकत्वस्य वक्तुमशक्यत्वात् अत एव गोशब्दशक्तौ गोत्वं नोपाधिस्तत्प्रकारकबोधादिति न्यायचिन्तामणावुक्तम् ।

नैयायिकास्तु—

यादृशार्थप्रकृत्यन्यो निपातान्यश्च वृत्तिमान् ।
स तादृशार्थे शब्दः स्यात् प्रत्ययोऽसौ चतुर्विधः ॥

यादृशार्थेत्यस्य वृत्तावप्यन्वयः । वृत्तिः शक्तिर्निरूढलक्षणा वा । प्राशस्त्ये मतुपो विधानात् । तथाच यादृशार्थप्रकृतिनिपातभिन्नत्वे सति यः शब्दो यादृशार्थे उक्तान्यतरवृत्तिमान् स तादृशार्थकप्रत्ययः । उक्तान्यतरवृत्त्या गुणगुणिनोः स्थितिप्रस्थानयोश्च बोधके शुक्लस्थादौ व्यभिचारवारणाय प्रकृतिभिन्नेति । शक्त्या समुच्चयादिबोधके चादिनिपाते तद्वारणाय निपातभिन्नेति । स्वरादयस्तु स्वपरतापामेव प्रकृतयो नत्वेकत्वादौ । तृतीयादौ सत्यपि कर्मत्वादेर्लक्षणा न निरूढा । प्रायशः प्रयोगविरहात् । पशुना रुद्रं यजते इत्यादौ त्वानुशासनिकत्वात् । स्वार्थिकप्रत्ययमात्रस्य स्वरूपमर्थः । तेन जुगुप्सते देवतेत्यादौ स्वार्थिक सनूतलादौ नातिव्याप्तिः । भावयज्ञादिनामप्युक्तैव गतिः । भावपदस्य धात्वर्थस्वरूपपरत्वात् । अन्यथा पाकं पश्येत्यादौ धात्वर्थस्य कर्मत्वान्वयो न स्यात् । सुवर्थे धात्वर्थान्वयस्याव्युत्पत्तेः । यद्वा

इतरार्थानवच्छिन्ने स्वार्थे यो बोधनाक्षमः ।
तिङर्थस्य निभाग्यन्यः स वा प्रत्यय उच्यते ।

यः शब्दः शब्दान्तराविशेषिततया तादृशस्वार्थविशेष्यकतिङर्थप्रकारकान्वयबोधने स्वरूपयोग्यः स तादृशार्थे प्रत्ययः । चैत्रोऽस्तीत्यादौ पदान्तरार्थानवच्छिन्नस्वार्थे नाम्नि तिङर्थान्वयबोधकत्वमेवेति नातिव्याप्तिः । चैत्रत्वविशिष्टचैत्रस्यैकनामार्थत्वेन तत्रैव कृत्यन्वयात् । पदान्तरार्थे धर्मितावच्छेदकीकृत्य यदर्थप्रकारकबोधो न भवत्येव तत्त्वमित्यर्थात् । पदान्तरपदेन च प्रत्ययत्वाभिमतार्थप्रकारकबोधो विशेष्यतासंबन्धेन यच्छब्दार्थे भवति तद्भिन्नपदं ग्राह्यम् । अन्यथा तिङपेक्षया भेदस्य चैत्रपदेऽपि सत्त्वात्तदर्थचैत्रत्वधर्मितावच्छेदककचैत्रविशेष्यकतिङर्थकृतिप्रकारकबोधोदयेनातिव्याप्तिः । यजेत स्थीयते इत्यादौ तिङां, पुत्रीयतीत्यादौ क्यजादीनां, पाचकोस्तीत्यादौ कृतां, काश्यपिरित्यादौ तद्धितानां प्रकृत्यर्थावच्छिन्ने एव स्वार्थे कृत्यादौ तिङर्थस्य वर्तमानत्वादेबोधकत्वं नतु तदवच्छिन्न इति न तेष्वव्याप्तिः । निभनीकाशादीनां समासमात्रप्रयोगभाजां तादृशस्वार्थे तिङर्थान्वयबोधं प्रति स्वरूपायोग्यत्वात् तद्वारणाय निभाद्यन्यत्वमपि निवेश्यमित्याहुः ॥

परश्च ॥ २ ॥

स्पष्टोऽर्थः । ननुपञ्चमीनिर्देशपरशब्दाध्याहारेण गापोरित्यादिषष्ठीनिर्देशे च आनन्तर्याश्रयेण परत्वसिद्धौ व्यर्थमेतदितिचेत् । न, पञ्चम्याकाङ्क्षितस्यावधेः पूर्वशब्देनापि समर्पणसंभवात् । आनन्तर्यस्यापि पूर्वत्वेन निर्वाहसंभवात् नियमार्थतया सूत्रप्रवृत्तेः । नच बहुजकचोः पूर्वे मध्ये च विधेर्बहुजेव पूर्वमकजेव मध्ये इति नियमार्थत्वात् प्रत्ययान्तराणां तदेशव्याहृत्या परत्वमेवार्थाद्विष्यतीति वाच्यम् । मध्यस्यानियतत्वेन टेः प्रागित्येव मध्यविशेषस्य तेन नियमेऽपि मध्यान्तरस्य व्यावर्तयितुम-

शक्यत्वात् । बहुजकचोर्विधेयत्वेन पुरस्तादेव बहुच् । प्राक्टेरेवाकच् इत्यस्यैव नियमार्थतया प्रत्ययान्तरे देशभेदस्य व्यावर्तयितुमशक्यत्वाच्च । नच तस्मादित्युत्तरस्येत्यनेन निस्तारः । परस्य सतो यत्कार्यं तत्रैव तत्प्रवृत्तेः । धर्मिणः परत्वविधाने तस्यानुपयोगात् । नियमार्थस्यापूर्वविधौ अप्रवृत्तेः ।

ननु नित्यशब्दपक्षे स्वभावत एव परस्य सनादेः साधुत्वमात्रं प्रतिपाद्यते । कार्यशब्दपक्षेऽपि न परग्रहणेनार्थः । तस्मादित्यस्य पञ्चमीनिर्देशलिङ्गेन प्रदेशेपूपस्थितस्य द्वेधार्थपर्यवसानात् । सत एव कार्यित्वेनोपादाने उत्तरस्य कार्यं भवतीति कार्यापेक्षा षष्ठी । असत एव विधाने उत्तरस्य भावो भवतीति भावापेक्षया कर्तृषष्ठीति ज्ञापनात् । नचैवं सन्नियादिप्रथमानिर्देशनैरर्थक्यमिति वाच्यम् । निर्देशमात्रार्थत्वात् । पञ्चात्परस्य सनो भावो भवतीति षष्ठीकल्पनात् ।

यद्वाऽनियतदेशे सनादेरुत्पत्तावपि कृत्कृत्यप्रत्ययादिसंज्ञाशास्त्रकार्यं यद्विधीयते तन्नान्यदेशस्य । यद्देशस्य च शास्त्रीयं कार्यं तद्देशस्यैव साधुत्वात्प्रयोगो भविष्यतीति न दोषः । त्रिकारागमेषु च पूर्वोक्तरीतिरनुसर्तव्यत्वात् । गापोष्टगित्यादौ धातोरित्यधिकाराद्धातोः परष्टक् गापोस्त्वनन्तर इति व्याख्येयम् । नचप्रयोगासमवायिनां किबादीनां सर्वदा लोपप्रतियोगिनां तस्मादित्युत्तरस्येत्यस्यानुपस्थानादनियतदेशे लोपः स्यात्तद्वारणाय परभूतानामेव लोपो यथास्यादित्येवमर्थमिति वाच्यम् । अनुबन्धासंजनेन लिङ्गेन तेषां परभूतानामेव लोपनिर्णयात् । अनुबन्धकार्यस्य कितीत्यादिविहितस्य परभूतप्रत्ययाश्रयत्वात् । तस्मिन्निति निर्दिष्टे पूर्वस्येति वचनात् । नचानियतदेशपक्षेऽपि पाक्षिकीं परतामुपजीव्यैवानुबन्धासङ्गस्य कृतार्थत्वात् कथं नियमेन परत्वसिद्धि-

रिति वाच्यम् । पाक्षिकवैयर्थ्यस्य तथापि दुष्परिहरत्वात् । स्पृशोनुदक इत्यादौ सकृत्श्रुतायाः पञ्चम्याः पूर्वपरान्यतराध्याहारेणोपपत्तौ यदा पूर्वशब्द एवाध्याह्रियते तदानुबन्धानर्थक्यस्य दुर्वारतया परभूतलोपलिङ्गत्वे बाधकाभावाच्चेति प्राप्ते ।

सिद्धान्तः । प्रयोगनियमार्थं वेति । वाशब्दो वार्तिकमते किंवाद्यर्थे परवचनमिति पक्षस्य स्थितत्वाद्विकल्पार्थे । भाष्यमते तु उक्तरीत्यान्यथासिद्धत्वात्तर्हीत्यर्थे परभूतानामेव प्रयोगो नत्वपरभूतानामेवेति नियमार्थमिदम् । नचविपरीतप्रयोगस्यादर्शनान्न तथेति वाच्यम् । सदेवदत्तो बाभ्रव्यो माण्डव्यो लामकायन इति प्रयोक्तव्ये बभ्रुर्माण्डुर्लमक इति, किमस्य प्रमाणमिति वक्तव्ये किमस्यद्वयसमिति च प्रयोगादर्शनात् तदसाधुत्वदर्शनाय नकेवला प्रकृतिः प्रयोक्तव्या, न केवलः प्रत्यय इति, नियमो बोध्यते । न च चन्द्रो मुखमित्यादाविवाभेदोपचारात्कथमसाधुत्वमिति वाच्यम् । भृत्यादावपि तदभेदोपचारदर्शनादपत्यार्थस्य नियमेनानवगमात् । तदुक्तं हारिणा—

सोऽयमित्यभिसंबन्धात्तद्धितेन विना यदि ।
बभ्रवादयः प्रयुज्येरन्नापत्ये नियमो भवेत् ॥

तस्मादपत्यविवक्षायामभेदोपचारव्यतिरेकेण गर्गा इति बहुवचनान्तवदेकवचनान्तानां बभ्रवादीनां प्रयोगो माभूदिति नियमार्थं वचनम् । एतेन रघूणामित्यादौ अभेदलक्षणेति सांप्रदायिकग्रन्थो व्याख्यातः । अभेदोपचारेणैव प्रयोगनिषेधात् । अत एव शक्तिभ्रमेण गवि प्रयुक्तो गवयशब्दोऽसाधुः । सादृश्यलक्षणया तु साधुरेवेत्यभ्युपगमः । उभयनियमश्चायम् । तस्मादित्युत्तरस्येतिसिद्धे प्रकृतेः पर एव प्रयोगो नतु पूर्व इति, माकदाचिदप्रयुक्तो भूदितिच । ननु वावचने परत्वोपलक्षितः सन् पक्षे भवति, पक्षे तु नैवोत्पद्यते इति

पाक्षिकप्रत्ययानुत्पत्त्यर्थं परग्रहणमस्तु । परत्वस्य प्रयोगे नियतत्वेन निवृत्तौ तात्पर्ययोगात् । अन्यथा तत्र प्रत्ययानुवृत्त्यौ वावचनेन प्रत्ययसंज्ञाया एव विकल्पः स्यादिति चेन्न । तत्र वृत्तिपक्षे सनो नित्यत्वात् । कर्तुमिच्छतीत्यवृत्तिपक्षे च तदनुत्पत्ते र्वावचनस्य प्रत्याख्यानात् । तस्मात्प्रयोगनियमार्थमेवेति स्थितम् ॥

आद्युदात्तश्च ॥ ३ ॥

नन्वस्वरस्याच उच्चारणानुपपत्तेरन्तोदात्तमध्योदात्तानुदात्तस्वरितानां च चित्त्वारित्त्व पित्त्वतित्त्वालक्षेन प्रत्ययविशेषे नियतत्वात्पारिशेष्यात्प्रत्ययान्तराणामाद्युदात्तत्वसिद्धिरिति चेत् । न, चिदादीनामनियतस्वरप्राप्तौ अन्तोदात्त एव चिदिति नियमो नतु चिदेवान्तोदात्तइति स्वरान्तरस्य तत्र व्यावृत्त्यनुपपत्तेः । तथा चतालिङ्गरहितानां प्रत्ययानामानियमेन स्वरप्राप्तौ नियमार्थमिदम् ।

स्यादेतत् । ञ्नित्यादिर्नित्यं प्रत्ययस्यच अदुपदेशाल्लसार्वधातुकमनुदात्तं सुप्पितौ चेति स्वरान्तरसंनिधावेवाद्युदात्तानुदात्तत्वे विधीयेयाताम् । अलं प्रत्ययसंज्ञासंनियोगेन तद्विधानेन । एवमाद्युदात्तानुदात्तयोः सकृद्ग्रहणे लाघवमिति चेत् । मैवम् । तथासति प्रत्ययग्रहणे यस्मात्साविहितस्तदादेस्तदन्तस्य चेति परिभाषया प्रकृतिप्रत्ययसमुदायस्यादिरुदात्तोऽन्त श्चानुदात्तः स्यात् । आद्युदात्तश्चेत्यस्य तु प्रतियोगमुपस्थाने आद्युदात्तत्वविशिष्ट एव तव्यादिरुत्पद्यतेऽनुदात्तत्वविशिष्टश्चतिवादिरिति नदोषः । उत्पन्नस्यैव प्रत्ययस्य तदादिग्रहणादिकार्यसंबन्धात् उत्पद्यमानस्य तदयोगात् ।

स्यादेतत् । ञ्नित्यादिर्नित्यमित्यारम्भादेवात्र न तदादिग्रहणम् । अन्यथा प्रत्ययस्येत्यनेनैव सिद्धौ तद्वैयर्थ्यापत्तेः । एवं

धातुप्रातिपदिकयोरन्तोदात्तत्वविधानसामर्थ्यात् सुप्तिङन्तौचेत्यत्रापि न तदन्तग्रहणम्। अनुदात्तप्रत्ययपरत्वस्थले एव तयोरन्तोदात्तत्वविधेः सप्रयोजनत्वात्। यातीत्यादौ कृण्णतर इत्यादौच पिति प्रत्यये तच्छ्रवणात्। यात इत्यादौ सतिशिष्टेन प्रत्ययस्वरेण तद्धाधात्। नचास्ते, शेते इत्यादौ तास्यनुदात्तेदिति लसार्वधातुकानुदात्तत्वे धातुस्वरस्यावकाशोऽस्त्विति वाच्यम्। न्यायसाम्येन तत्रापि तदादिग्रहणप्रसङ्गात्। नच यथान्यासे लवितव्यामित्यादौ तव्यप्रत्ययस्योत्पत्तिशिष्टाद्युदात्तत्वप्रवृत्तेस्तदुत्तरं प्रवर्तमान इडागमः शेषनिघातेनानुदात्तो भवति। उक्तरीत्यातु तव्यप्रत्ययोत्पत्त्यनन्तरं आद्युदात्तत्वं बाधित्वा परत्वादिडागमे कृते पुनः प्रसङ्गविज्ञानात्प्रवर्तमानमाद्युदात्तत्वं इडागम एव विश्राम्येदिति वाच्यम्। आगमानामनुदात्तत्वस्यावश्यमारम्भणीयतया तेनैव गतार्थत्वात्।

तथाहि—लूञ् छेदने लुटि तिपो डा तासिः इट्। यद्यत्रेटोऽनुदात्तत्वं नस्यात्तदा तासिभक्तत्वादिदुदात्तः। शेषनिघातेन च तास्याकारोऽनुदात्तः। टिलोपे कृते तस्योदात्तलोपत्वाभावादाकारस्योदात्तनिवृत्तिस्वरेणोदात्तत्वं न स्यात्। इटोऽनुदात्तत्वे तु तास्याकारस्योदात्तत्वादुदात्तनिवृत्तिस्वरः सिद्ध्यति। अत्र ह्याद्युदात्तस्य इटश्च प्राप्तौ परत्वादिट्। कृताकृतप्रसङ्गित्वेन द्वयोर्नित्यत्वात्। नचेटि कृते शब्दान्तरप्राप्तेः स्वरोऽनित्य इति वाच्यम्। स्वरकृते इटोऽपि शब्दान्तरप्राप्त्या तथात्वात्। आगमवत्स्वरस्यापि शब्दभेदहेतुत्वात्। श्रुतिभेदस्योभयत्र साम्यात्।

अथान्तरङ्गत्वादाद्युदात्तत्वमेव पूर्वं प्रवर्तते। उत्पत्तिसंनियोगशिष्टत्वात्। उत्पन्ने प्रत्यये प्रकृतिप्रत्ययावाश्रित्याङ्गस्येडागम इति बहिरङ्गत्वात्। नचप्रत्ययग्रहणपरिभाषया प्रत्ययाश्रयणे प्रकृतिरप्याश्रितैवेति वाच्यम्। प्रत्ययस्वरविधौ तदादिविधिर्नास्ती-

ति अस्य समनन्तरमेवोक्तत्वात्। तथाचाद्युदात्तत्वानन्तरं प्रवर्तमान इट् शेषनिघातेनानुदात्त एव भविष्यतीति किमित्यागमानामनुदात्तत्वमारभ्यमितिचेत्। न। तथापि लविषीयेत्यत्राशीर्लिङि विशेषविहितत्वात्पूर्वं सीयुटि कृते पश्चाल्लादेशप्रवृत्त्या तत्र प्रवर्तमानमाद्युदात्तत्वं सीयुट एव स्यात्। आगमानामनुदात्तत्वविधाने तु सीयुटोऽनुदात्तत्वे कृते इटोदित्यकारादेशस्योदात्तत्वं सिद्ध्यतीति तस्यावश्यमारभ्यत्वात्। एवंचागमे कृते तद्विशिष्टस्यैव प्रत्ययत्वं नतु केवलस्यापीति भाष्याभिप्रायो लभ्यते। अन्यथा सीयुटि कृतेऽपि इटः प्रत्ययत्वे तदुदात्तत्वस्य सिद्धावनुपपत्त्यभावादिति केचित्।

अन्ये तु आगमविशिष्टस्य केवलस्यच प्रत्ययत्वात्कदाचित्सीयुट ईकार एवोदात्तः स्यात् इति तव्द्यावृत्त्यर्थमागमानामविद्यमानवचनमावश्यकमेव। अतएव प्रत्ययादेर्झस्यान्तादेश इति व्याख्यानं निर्दोषम्। शयांतैरित्यत्र अडाटोः कृतयोरपि झकारस्य प्रत्ययादित्वानपायादिति व्याचख्युः।

यत्तु आगमा अनुदात्ता इति विशेषवचनेन सीयुटोऽनुदात्तत्वे तत्रोदात्तत्वस्य न प्रवृत्तिरिति। तदसत्। तद्वचनानारम्भपक्ष एवोक्तापत्तेर्भाष्यकृद्भिरुपन्यासात्। उक्तदोषभयादेवागमानुदात्तत्ववचनस्याश्रितत्वात्। तच्च ज्ञापकबललभ्यम्। यासुट्परस्मैपदेषूदात्तो ङिच्चेति यासुट उदात्तवचनेनागमान्तराणामनुदात्तत्वानुमानात्। नचचिनुयादित्यादौ पिद्भक्तत्वाद्यासुटोऽनुदात्तत्वप्रसङ्गे उदात्तविधानार्थत्वमेव तस्येति वाच्यम्। अपिच्चलिङित्येवं यासुट्संनियोगेन लिङोऽपित्त्वविधानेनापि तादृशार्थसिद्धेः। यथान्यासे हि नवमात्राः। उक्तन्यासे षडेवेति लाघवसम्भवात्। तथाच गुरुतरन्यासकरणसामर्थ्यादागमा अनुदात्ता इति ज्ञापन-

मव्याहृतम् ।

यद्यप्यागमैः स्वोत्तरस्याच आदित्वनिरासात्कथमाद्युदात्तत्वम् । आगमानामविद्यमानवद्भावातिदेशे तु अवादेशादिकं न स्यात् । स्वरविधावेवाविद्यमानत्वमितिचेत् । लवितेत्यत्रोदात्तादनुदात्तस्येति स्वरितो न स्यात् । तृन्नन्ताद्युदात्तं ह्येतत् । शेषनिघातेन द्वयोरनुदात्तत्वम् । तत्राविद्यमानवद्भावेनेटः स्वरितत्वानुपपत्तेः । नचषाष्ठिकस्वरविधावेव तदतिदेश इति वाच्यम् । चिन्तित इत्यत्र निष्ठाच दृव्यजनादिति स्वरप्रसङ्गात् । तथापि प्रत्ययस्वरविधावुक्तातिदेशान्नदोषः । सचातिदेशो ज्ञापकसिद्धः । प्रत्ययादुयुदात्तत्वे कर्तव्ये यद्यागमानामादित्वविघातकत्वं स्यात् तदा चिनुयातामित्यादौ यासुटः प्रत्ययादित्वात्सिद्धमुदात्तत्वमिति यासुट उदात्तत्ववचनं व्यर्थं स्यादतः प्रत्ययादुयुदात्तत्वे कार्ये आगमानामविद्यमानवद्भावं ज्ञापयतीति नानुपपत्तिः । तस्मादागमानुदात्तत्वानुरोधादपि प्रत्ययसंज्ञासंनियोगेनादुयुदात्तत्वं नारम्भणीयम् ।

अथ स्त्रौघ्नी माथुरीत्यादौ विभज्यान्वाख्याने स्त्रौघ्न ई इति स्थिते आदुयुदात्तत्वं बाधित्वा परत्वाद्यस्येतिचेति अकारलोपे कृते उदात्तनिवृत्त्यभावादुदात्तनिवृत्तिस्वरो न स्यात् । प्रत्ययसंज्ञासंनियोगेन त्वाद्युदात्तत्वविधानेऽणो लोपप्रवृत्तेः पूर्वमेवोदात्तत्वादनुदात्ते ङीपि परेच तल्लोपादुक्तस्वरासिद्धिरितिचेत्तदप्यसत् । स्वार्थादीनां क्रमेण प्रतीतिरितिन्यायेन स्त्रीत्वनिमित्तकप्रत्ययस्य बहिरङ्गत्वात्तन्निमित्तकस्य लोपस्यापि तथात्वेन प्रथममन्तरङ्गस्याद्युदात्तस्यैव प्रवृत्तौ उक्तस्वरासिद्धेः । एवमङ्गस्य भस्येत्यस्य चापेक्षितत्वादपि लोपस्य बहिरङ्गत्वमवसेयम् । अन्यथा औत्सी कांसिकी आत्रेयीत्यत्रापि लोपेन ञित् नित् कित्

स्वराणां बाधापत्तौ उदात्तनिवृत्तिस्वरो न स्यात । यद्यपि जिदादिस्वराणां प्रत्ययस्वरापवादत्वादेव बलवत्त्वं कंसेन क्रीता कांसिकी । कंसाट्टिठाजिति ठचश्चित्करणसामर्थ्यात्पूर्वमिकादेशः ततः प्रत्ययाद्युदात्तत्वं ततश्चादेरुदात्तत्वं अन्त्यस्य लोप इति नास्ति विप्रतिषेधः । तथाप्यात्रेयीत्यत्र इतश्चानिञ इति ढक् । आयनादिपूपदेशिवद्वचनं स्वरसिध्यर्थमिति पूर्वमेयादेशः ततो ङीप् । अत्रान्तरङ्गपरिभाषां विनोदात्तनिवृत्तिस्वरो न स्यात् । अतः प्रत्ययसंज्ञासन्नियोगेनाद्युदात्तवचनं व्यर्थमिति पूर्वपक्षः ।

सिद्धान्तस्तु उक्तन्यासे परत्वाद्धातुस्वरं प्रत्ययस्वरो बाधेत यथान्यासे तु प्रत्ययस्वरं धातुस्वरो बाधते परत्वादिति । अस्मिन्नेव प्रदेशे आदृयुदात्तविधानं युक्तम् । प्रामाणिकगौरवस्य न्याय्यत्वात् । तथाहि प्रत्ययाद्युदात्तस्यावकाशः समत्वमित्यत्र प्रकृतेरनुदात्तत्वे धातुस्वरस्य प्रसयो यत्रानुदात्तः तत्र पचतीत्यादौ गोपायति धूपायतीत्यत्र धातोरन्तइति भवति विप्रतिषेधेन । तत्राहि गुपित्यस्य पूर्वमन्तोदात्तः तत आयप्रत्ययः सनाद्यन्ताइति धातुसंज्ञा । तत्र स्वरद्वयप्राप्तौ अन्तोदात्त एव । तथापचतीत्यादौ कार्यमित्यादौच सावकाशयोः पित्त्वतित्त्वानिबन्धनयोरनुदात्तस्वरितयोः कार्या हार्येत्यत्र टापि पूर्वमेकादेशे कृते तस्य पूर्वं प्रत्यन्तवद्भावात्तित्स्वरः परं प्रत्यादिवद्भावात्तु पित्स्वरः प्राप्नोति । विप्रतिषेधात्तित्स्वरः । पित्स्वराच्चित्स्वरो विप्रतिषेधेन । पित्स्वरस्यावकाशः पूर्वोक्तः । चित्स्वरस्य चलनः कम्पन इति युजन्तम् । आम्बष्ठ्या सौवर्येत्यत्र यङ श्चापि कृते उभयं प्राप्नोति । चित्स्वरो भवति परत्वात् ।

वस्तुतस्तु नायं विप्रतिषेधो युक्तः । आयप्रत्ययस्य संनियोगशिष्टत्वादाद्युदात्तत्वे कृतेऽपि सति शिष्टस्वरबलीयस्त्वमिति

रीत्या पश्चात्प्रवृत्तधातुसंज्ञानिबन्धनस्यान्तोदात्तस्य निर्बाधत्वात् । पित्स्वरितित्स्वरयोरपि तथा शब्दान्तरप्राप्त्या तयोरनित्यत्वेऽपि परत्वात्पूर्वं स्वरिते कृते एकादेशप्रवृत्तेः स्वरितानुदात्तयोरेकादेशोऽन्तरतमत्वात्तित्स्वरः । स्वरितेऽनुदात्तभागस्यापि सत्त्वात् । आम्बष्ठ्येत्यत्रापि चित्करणसामर्थ्यादन्तोदात्तसिद्धेः । नच(१) सामान्यविधातार्थश्चकार इति न सामर्थ्यमिति वाच्यम् । तावन्मात्रार्थत्वे टापूप्रकरणे एव तद्विधानप्रसङ्गात् । तस्मात्संज्ञासन्नियोगेन प्रत्ययानामादुदात्तत्वविधानं सार्थकमिति सिद्धम् ।

अनुदात्तौ सुप्पितौ ॥ ४ ॥

पूर्वापवादः । सुपः पितश्च प्रत्यया अनुदात्ताः । सुप्त्वापित्वाभ्यामनुगमस्य सूत्रे द्वित्वम् । दृषद्दृषदौ दृषदः । पचति पठति ।

गुप्तिच्किन्द्यः सन् ॥ ५ ॥

गुप् गोपने । तिज् निशाने । कितनिवासे रोगापनयेच । मानुत्तरसूत्रे वक्ष्यते एते अनुदात्तेतो निर्दिश्यन्ते इतिभाष्यम् । तत्स्वरसादेव 'स्वाश्रयं कश्चिकित्सतु' इति खण्डनव्याख्यायां चिकित्सतामिति युक्तमिति वर्द्धमानः । कैयटस्तु क्रमदर्शनाय कितिपठितो नत्वयमनुदात्तेदिति व्याचख्यौ । वक्ष्यमाणेष्वेवार्थेषु एतेषामात्मनेपदित्वमर्थान्तरेऽननुबन्धाश्चुरादय एवैते बोध्याः । अयं चार्थविशेषो मुनित्रयानुक्तोऽपि इच्छासन्विधौ श्रुतस्य वाग्रहणस्यैतत्सूत्रद्वये व्यवस्थितविभाषात्वेनार्थविशेषपुरस्कारेणैव सनोविधानाद्वृत्तिकारादिभिः प्रयोगानुसारादुपनिबद्धः । अत एतदर्थेषु धात्वन्तरत्वादेषां नित्यं सन्निषयत्वादनुदात्तरूपलिङ्गस्या-

(१) सामान्यग्रहणाविघातार्थं इति पुस्तकान्तरे पाठः ।

वयते चरितार्थत्वात्समुदायविशेषकत्वमिति सन्नन्ते च आत्मनेपदप्रवर्तकत्वम् । अयं विशेषः । गुपेर्निन्दायां सन् । तिजेः क्षमायाम् । कितेर्व्याधिप्रतीकारे निग्रहे अपनयने नाशने संशये च । मानेर्जिज्ञासायाम् । बधेश्चित्तविकारे । दानेरार्जवे । शानेर्निशाने इति । सनाद्यन्ता धातव इति धातुत्वम् । तङ् सन्यङोरिति द्वित्वम् । धातोरित्यविहितत्वान्नार्धधातुकत्वम् । तेनेड्गुणौ न । यद्यपि हलन्ताच्चेति सनः कित्त्वादपि गुणाभावः सुसाधः तथाप्युक्तरीत्या तत्प्रसक्तिरेव नास्तीति किन्तदनुसरणेन । जुगुप्सते । तितिक्षते । चिकित्सति । प्रत्ययान्तत्वादाम् । जुगुप्सां चक्रे इत्यादि ।

मानबधदानशान्भ्यो दीर्घश्चाभ्यासस्य ॥ ६ ॥

एभ्यः सन्स्यात् अभ्यासस्य दीर्घश्च । मान पूजायाम् । बध बन्धने । अत्र दानशानौ स्वरितेतौ । आद्यौ अनुदात्तेतौ । मीमांसते । बीभत्सते भष्भावचर्त्वे । दीदांसति । दीदांसते । शीशांसति । शीशांसते ।

ननु दीर्घत्वमभ्यासाकारस्य प्राप्नोति । विशेषविधेः सामान्यबाधकतया सन्यत इतीत्वस्य दुर्लभत्वात् । अभ्यासस्येतिवचनादभ्यासप्रतीक्षायामपि इत्वापेक्षायां प्रमाणाभावात् ।

उच्यते । ईच्चाभ्यासस्येति सूत्रयितव्यम् । नचैवं हलादिः शेषस्यापिबाधापत्तिः । ईचाच इति वाच्यत्वात् । हलादिशेषेविनाऽभ्यासस्याजन्तत्वाभावेन तदबाधात् । यद्वा दीर्घश्चेतोभ्यासस्येति सूत्रणीयम् । तथाचानुवादसामर्थ्यादित्वप्रवृत्त्यनन्तरं दी-

र्घः । यद्वाऽऽभ्यासस्येति छेदः । अभ्यासस्य विकार आभ्यासः । सचार्थादित्वमेव । लोपस्याभावरूपतया तदादेशस्य विधातुमशक्यत्वात् । तत्प्रयोज्यनिवृत्तिप्रतियोगित्वं हि स्थानित्वम् । ह्रस्वाकारस्यैव दीर्घविधानेतु तद्धितनिर्देशवैयर्थ्यम् । दीर्घश्रुत्याऽचश्रेति परिभाषोपस्थानात् । अजन्तस्य ह्रस्वस्य दीर्घस्य वा दीर्घविधाने विशेषाभावात् । यद्वासन्निमित्तकविकारस्यैव ग्रहणात्

वस्तुतस्तु अभ्यासविकारेष्वपवादा उत्सर्गान्न बाधन्ते इति दीर्घोकित इत्यकिदग्रहणेनज्ञापयिष्यमाणत्वादित्यानन्तरमेव दीर्घ इति नदोषः । भामत्यां तु मीमांसाशब्दो माङ्माने इत्यस्मादुत्पन्नः । नच तस्य सूत्रेऽनुपादानात्सनो ऽसिद्धिः । मानित्यनेनैव नकारान्तत्वं निपात्योक्तधातोर्ग्रहणसम्भवात् । मुण्डमिश्रादिसूत्रे हलकलयोरदन्तत्ववत् इति शब्दतात्पर्याभ्यामुक्तम् । नच सनिमीमेति इस्भावापत्तिः । ष्वादिसाहचर्येणेच्छासन्येव तद्विधानादिति दीक्षिताः । एवंच नान्तत्वनिपातनस्य स्वकल्पनायामन्तर्भावो न युक्तः । वाचस्पतिमिश्रैः स्वयमेवोक्तत्वात् । मानपूजायामिति वृत्तिग्रन्थो भङ्क्त्वाव्याख्येय इत्यपि मिश्रतात्पर्यकल्पनमयुक्तम् । तस्मादपि सन्प्रत्ययस्य मिश्रैरेव लिखितत्वात् । अतएव माङ्माने इत्यस्मान्मीमांसाशब्दे पूजितविचारार्थत्वं प्रसिद्धिवशात् । मानपूजायामित्यस्मात्तु स्मृत्यैवेति तत्र कल्पतरुकारैरुक्तमिति दिक् ।

धातोः कर्मणः समानकर्तृकादिच्छायां वा ॥ ७ ॥

अत्रार्थद्वारके कर्मत्वसमानकर्तृकत्वे तेच सन्निधानादिच्छा-

निरूपिते एव तथाच धात्वर्थविषयकेच्छायां धातोः सन् । सधात्वर्थ इच्छा च समानकर्तृके स्याताम् । इच्छाया धात्वर्थकर्तृसमवेतत्वे सतीति यावत् । अतएवजिज्ञासा इत्यादौ स्वसमानाधिकरणज्ञानेच्छायाः प्रतीतिः । पक्तुमिच्छति पिपक्षति चैत्रः । सनूप्रकृत्यर्थस्य सनर्थ इच्छायां विषयत्वेनान्वयः । चैत्राभिन्नकर्तृका पाकविषयिका इच्छेति सनर्थविशेष्यको बोधः । सन्नन्तस्य धातुत्वेनेच्छायाः प्रधानत्वात् ।

न्यायमते तु सविषयार्थकधातूत्तराख्यातस्याश्रयलाक्षणिकत्वेनेच्छाया आश्रये तस्याभेदेन चैत्रेऽन्वयः । पाकविशेष्यकेच्छाश्रयाभिन्नः चैत्रः ।

मणिकृन्मते तु इच्छाया एवाश्रयत्वसम्बन्धेन चैत्रेऽन्वयः । आख्यातं च धातुसाधुत्वार्थमित्युक्तेच्छाश्रयश्चैत्र इतिधीः । ओदनं बुभुक्षते इत्यत्रभोजनविशेष्यतया ओदनस्य इच्छाविषयत्वानुभवाद्धातोः सन्प्रत्ययाभिधेयेच्छाप्रकारवाचित्वं । पाकं चिकीर्षतीत्यत्रापिं प्राधान्येन पाकस्येच्छाविषयत्वमनुभूयते नतुकृतेः इत्याहुः ।

केचित्तु सकर्मकधातावपि कर्माविवक्षायामकर्मकेऽपि गृहे तिष्ठासतीत्यादौ धात्वर्थविषयकेच्छाया एवानुभवः । अतः स्थितिप्रकारकगृहविशेष्यकेच्छाभिप्रायेण गृहं तिष्ठासतीति नप्रयोगः । नच विशेष्यत्वस्यौदनं बुभुक्षत इत्यादौ द्वितीयार्थत्वाभावे पाकत्वं चिकीर्षति शत्रुधननाशेच्छायां शत्रुधनं चिकीर्षतीत्यपि स्यादिति वाच्यम् । कृञ् योगे साध्यत्वाख्योद्देश्यत्वाख्यविषयतयोरन्यतरस्यैव द्वितीयार्थत्वादित्याहुः ।

स्यादेतत् । धातोरिति किमर्थम् । नचसोपसर्गात्तद्वारणार्थं तत् । अन्यथा द्विर्वचनाडागमावुपसर्गस्यैव स्याताामिति वाच्य-

म् । कर्मत्वममानकर्तृकत्वयोरुपादानात्तयोश्च क्रियैकनिरूप्यत्वात् । क्रियायाश्च धातुमात्रवाच्यत्वात् । उपसर्गस्यच द्योतकमात्रत्वात् । धातोरेव तदुत्पत्तिसम्भवात् । वाचकत्वपक्षेऽपि विशेष्यमात्रस्य कर्मत्वं विशेषणात्तु सामानाधिकरण्यप्रयुक्ता द्वितीयेति पक्षे उपसर्गार्थस्य पृथगकर्मकत्वात् । कटोऽपि कर्म भीष्मादयोऽपीति पक्षेपि समुदायस्याकर्मकत्वात्तस्मादनुत्पत्तेः । अन्यथाधातोरित्युक्तेप्यनिस्तारात् । अर्थद्वारके हि समुदायस्य कर्मत्वे आश्रीयमाणेऽवयवस्याकर्मकत्वात् ततः सन् प्रत्ययो न स्यात् । कर्मण इति पञ्चम्यन्तनिर्देशात् । नच कर्मण इतिषष्ठीमाश्रित्य कर्मणोऽवयवाद्धातोः सन् इत्यर्थ इति वाच्यम् । केवलाद्धातोस्तदनुत्पत्तिप्रसङ्गात् । तस्मात्

अडादीनां व्यवस्थायै पृथक्त्वेन प्रकल्पनात् ।
धातूपसर्गयोर्धातुः क्रियावाचीति निर्णयः ।

नापि सुबन्तात्सनुत्पत्तिवारणार्थं तत्र विशेषविहितानां क्यजादीनां अपवादविधया बाधकत्वात् । नच सनो वैकल्पिकत्वात्तदभावपक्षे क्यजादीनां सावकाशत्वमिति वाच्यम् । उत्सर्गापवादयोर्द्वयोरपि वैकल्पिकत्वे अपवादनिमुक्ते उत्सर्गस्याप्रवृत्त्या वाक्यस्यैव प्रवृत्तेः । सुबन्तादुत्पद्यमानेन सना इच्छानवबोधादनभिधानेनापि तद्वारणस्य सुकरत्वाच्च । नच प्रातिपदिकात्सनुत्पत्तिवारणार्थम् । कर्मणइति वचनात् कर्मत्वेच सति सुबन्ततायाः आवश्यकत्वात् । तदेतदाह वार्तिककारः । "कर्मग्रहणात्सन्विधौ धातुग्रहणानर्थक्यम्" । सोपसर्गकर्मेति चेत् । कर्मविशेषकत्वादुपसर्गस्यानुपसर्गं कर्म सोपसर्गस्य हि कर्मत्वे धात्वधिकारेऽपि सनोऽविधानमकर्मत्वादिति प्राप्ते—

सिद्धान्तः । यत्तावदुक्तम् । अनभिधानादिति तदगतिक-

गतिमात्रम् । लक्षणाश्रयणाद्धिलक्ष्यव्यवस्था न्याय्या । गत्यन्तराभावात्तु पचन्तीत्यादौ लक्ष्यानुरोधेन लक्षणव्यवस्थापनात् । यदप्युक्तम् । क्यजादीनामपत्वादत्वादिति तदप्यसत् । आत्मीयत्वेन सुबन्तेच्छायामेव क्यजादेर्विधानाद्राज्ञः पुत्रमिच्छतीत्यादौ परकीयत्वेन तदिच्छायां मनो दुर्वारत्वात् ।

अथात्र समानकर्तृकत्वग्रहणादेव न दोषः । सुबन्तेन सह समानकर्तृकत्वानुपपत्तेः । पुत्रादेः सत्त्वभूतार्थाभिधायित्वात्साध्यस्यैव साधनसम्बन्धयोग्यत्वात् । नच कटं करोतीत्यादौ कटादीनामपि सत्त्वभूतार्थपरत्वात्कथं साधनाकाङ्क्षेति वाच्यम् । शब्दान्तरसन्निधानादेव तत्र साध्यत्वप्रत्ययात् । तदुक्तं हरिणा—

निर्वर्त्यो वा विकार्यो वा प्राप्यो वा साधनाश्रयः ।
क्रियाणामेव साध्यत्वात्सिद्धरूपोऽभिधीयते ॥

अतो नैतदर्थं धातुग्रहणमित्युच्यते तथापि आसितुमिच्छति-शयितुमिच्छतीत्यादौ तुमुनन्तस्य साध्यरूपाभिधायित्वात्कर्तृयोगसम्भवात्तत्र सनो दुर्वारत्वात् । क्वचि मान्ताव्ययप्रतिषेधस्य वक्ष्यमाणत्वात् । नन्वत्रेच्छतीत्यनेन तुमुनो निमित्तेन इच्छाया अभिधानान्न सन् । उक्तार्थानामप्रयोगात् । तुमुन उपपदनिमित्तकत्वेन तदभावे तुमुनोऽसम्भवेन इच्छतीत्यस्य प्रयोगं बाधित्वा सन्विधेर्दुरुपपादत्वात् इति चेत् ।

सत्यम् । तथाप्यासनमिच्छतीति ल्युटो भावमात्रविहितत्वादिच्छार्थोपपदनिमित्तत्वाभावात्सनो दुर्वारत्वात् । नचात्रापि ल्युडभिधेयभावस्य सत्त्वरूपत्वान्न समानकर्तृकत्वयोग इति वाच्यम् । धातुवाच्यक्रियाया असत्त्वभूतत्वात्तदपेक्ष्य समानकर्तृकत्वोपपत्तेः । अथ वृत्तिसमानार्थकेन वाक्येन भवितव्यम् । आसिसिषते इत्यस्य चासितुमिच्छतीति वाक्यं समानार्थम् । समानकर्तृकत्वस्योभयत्र

प्रत्ययात् । आसनमिच्छतीत्यत्र तु स्वस्य परस्य वेति संशयात्समानकर्तृकत्वप्रतीतिनियमाभावात्सन्न भविष्यति । समानकर्तृकत्वस्य तत्र सनान्तर्भावयितुमशक्यत्वात् । अन्यथा धातुपदोपादानेऽपि संगतमिच्छति देवदत्तो यज्ञदत्तेनेत्यत्र सनो दुर्वारत्वात् । इह केवलस्य धातोः प्रयोगाभावात्क्त्वाप्रत्ययोपादानम् धातोरेवं सन्प्रत्ययस्यापाद्यत्वात् । समानकर्तृकत्वप्रतीतिपि-पादयिषायां संजिगंसते वत्सो मात्रेति सन इष्टत्वात् ।

एवं कर्मसमानकर्तृकग्रहणमपि व्यर्थम् । संकीर्णप्रयोगदर्शने साध्वसाधुविभागार्थं हि शास्त्रारम्भः। गमनेनेच्छति देवदत्तस्यभोजनमिच्छतीत्यर्थेच जिगमिषति बुभुक्षते इत्यादिप्रयोगादर्शनात् । इच्छायां सन्विधानेनैवोपपत्तेः । इच्छायाः कर्मणोऽवश्यंभावात् । संनिधानात्प्रकृत्यर्थस्यैव कर्मत्वाश्रयणात् । समानकर्तृकत्वस्यापि प्रत्यासत्त्यैव सिद्धिसम्भवादितिचेन्न । अङ्गपरिमाणार्थं कर्मणो धातोर्वित्यन्यतरस्योपादानावश्यकत्वात् । समानकर्तृकत्वस्य गुरुत्वात् । इच्छायां वेत्युच्यमाने प्रत्ययपरत्वेन प्रकृतेराक्षेपेऽपि प्राचिकीर्षदित्यादौ सोपसर्गस्याङ्गत्वं स्यात् । साक्षात्प्रकृतिविशेषनिर्देशेतु अंगस्वरूपस्य सुज्ञानत्वात् ।

इदंच यद्यपि अन्यतरग्रहणेनापि सिध्यति तथापि धातुग्रहणमेवावश्यकम् । धातोरिति शब्दमुच्चार्यविहितत्वात्सन आर्धधातुकसंज्ञाया आपि सिद्धेः तेन शिशायिषते इत्यादौ गुण इट्च सिद्धः । पूर्वसूत्रद्वयाविहितस्य तु सनो नार्धधातुकत्वमित्युक्तमेव । नचेकोझलिति सनः कित्त्वविधानं गुणनिषेधार्थं सत् स्वप्नयोऽनिषेधप्रतियोगिप्रसंजकत्वेनार्धधातुकत्वं सन आक्षेप्स्यतीति वाच्यम् । सामान्येन ज्ञापकत्वे सर्वत्र तत्प्रसङ्गात् । विशेषविषयत्वे त्विगन्तान्यस्मिंस्तदनाक्षेपात् ।

यदप्युक्तम् । सोपसर्गं न कर्मेति । तदप्यसत् । संघातेन क्रियाविशेषप्रकमादर्थद्वारकस्य कर्मत्वस्य समुदाय एव विश्रान्तेः । विशिष्टक्रियाया एव साधनानिर्वर्त्यत्वात् । नाहि विशेषणविशेष्ययोः स्वस्वकारणनिर्वर्त्यत्वान्नीलघटयोरिवात्रार्थः समाजः तत्रनीलत्वघटत्वयोर्भिन्नकारणप्रतियोगिककार्यतावच्छेदकतया विशिष्टस्यार्थसिद्धत्वादत्र तु प्रकर्षं प्राति कारणान्तरस्याकल्पितत्वात् । नचोपसर्गस्य द्योतकत्वाद्विशिष्टो धात्वर्थ एवेति वाच्यम् । तथापि तादृशविशेषस्यात्र शब्दानुपात्तत्वेन संघातस्यैव विशिष्टप्रतीत्यन्वयव्यतिरेकप्रयोजकान्वयव्यतिरेकप्रतियोगितया तस्मादेव सन्प्रत्ययापत्तेः ।

यत्तूपपदमतिङित्यत्रोक्तम् । साधनं हि क्रियां निर्वर्तयतितामुपसर्गो विशिनष्टि इति तदपि विशिष्टक्रियोत्पत्तिमाश्रित्यैवेत्यविरोधः । पूर्वं धातुः साधनेन युज्यते इति पक्षेऽपि प्रकृते विशिष्टक्रियाया एव कर्मत्वस्य प्रतिपिपादयिषितत्वात्सोपसर्गात्सन्प्रसङ्गसंभवाच्च ।

यदपि विशिष्टात्सन्प्रत्ययो नस्यादिति तदप्यसत् । कर्मणोऽत्रयवाद्धातोरिति व्याख्यानात् । नचैवं केवलादप्रसङ्गः । व्यपदेशिद्भावेन केवलस्यापि स्वावयवत्वात् । अनुदात्तङित इत्यादौ ङिदन्तस्येति व्याख्यानावश्यकत्वे शीङादेर्ङिदन्तत्वस्य तथैव वाच्यत्वात् । नचैवं महान्तं पुत्रमिच्छतीत्यादौ क्यजापि स्यादिति वाच्यम् । सुबन्तात्क्यङ्विधानेन तस्य पदाविधित्वात्समर्थपरिभाषोपस्थानेन सापेक्षत्वादसामर्थ्यात् । सन्विधौ तु पदाविधित्वाभावात्सापेक्षत्वेऽपि सन्प्रत्ययः ।

यद्वा धातुरेव विशिष्टक्रियावाची उपसर्गस्तु द्योतक इति नसापेक्षत्वम् । वावचनं तु व्यर्थम् । वृत्तेरेकार्थीभावविषयत्वात् ।

वाक्यस्यच व्यपेक्षाविषयत्वाच्छिन्नविषये बाध्यबाधकभावानुपपत्त्या वाक्यस्य सुस्थत्वात् । प्रत्युत वाक्यनेन एकार्थीभावपक्षे सनभावस्य विधातुमशक्यतया प्रत्ययसंज्ञाया एवाभावस्य विधेयत्वादानर्थक्यापत्तेः । तन्निबन्धनकार्यविकल्पापत्तेश्च ।

अत्रवार्तिकम् । तुमुनन्ताद्वा, तस्य लुग्वचनमिति । अयमर्थः । तुमुनन्तात्सनिति लक्षणं कर्तव्यम् । समानकर्तृकधातुकर्मपदानामनुपादानेन लाघवात् । वचनसामर्थ्याच्चोपपदश्रवणं बाधित्वा पक्षे तदीयेऽर्थे सनुप्रत्ययो भवति । इच्छाग्रहणं प्रत्ययार्थनिर्देशार्थावश्यं कर्तव्यम् । तुमुनश्च लुग्वक्तव्यः । नन्वेवं तुमुनन्तस्य पदत्वात्तुमुन् लुकि कृत्ते जिघांसतीत्यादौ नलोपादिप्रसङ्ग इतिचेत् । अत्राहुः । आसिद्धं बहिरङ्गमन्तरङ्गे इति लुकोऽसिद्धत्वान्नदोष इति । अस्मिन् सूत्रन्यासे इकोझलिति ज्ञापकाद्धार्धधातुकत्वमाक्षेप्यमिष्टसिध्यर्थम् । 'लिङुत्तमाद्वा सन् उत्तमस्य च लोपो वक्तव्यः' । कुर्यामिति इच्छति चिकीर्षति । अत्र चैत्रश्चिकीर्षतीत्यत्र सनप्रत्ययप्रकृतेस्तिङन्तत्वात्तिङ्ङतिङ इति निघातः आत्मविशेषगुणविशेषकान्तिवाचकस्य इषेरर्थे चायं विधीयते नतुभ्राश्यन्विकरणयोरित्यत्रधेयम् ।

'आशङ्कायामचेतनेषूपसंख्यानम्' इवा मुमूर्षति । कूलं पिपतिषति । यद्यपि इवा चेतन एव तथापि दुःप्रसक्तः दुःखाभावमपयोजकत्वेन मरणेच्छायास्तत्रासंभवादिदमुक्तम् । अचेतनग्रहणं नकर्तव्यमिति यावत् ।

भाष्यकारस्तु चेष्टादिना इच्छामनुमाय कटं चिकीर्षतीत्यादिप्रयोगवत् अवयवशैथिल्यलोष्ठपतनादिलिङ्गकेच्छानुमित्या उक्तस्थलेऽपि सनुप्रत्ययः । वस्तुतः कूलादौ इच्छाया असत्वेऽपि क्षतिविरहात् । नच लोष्ठपतनादावेच्छाकार्यत्वमेव नास्ति इतिवा-

क्यम् । आरोपेणैव भ्रमानुमितिनिर्वाहात् । 'उपमानाद्वा सिद्ध'-मिति तु प्रत्याख्यातम् । 'नवै तिङन्तेनोपमानमस्ती'ति । अत्र व्याचक्षते । तिङन्तार्थेन नोपमानम् । क्रियायाः साध्यैकस्वभावत्वात् । अनिष्पन्नरूपत्वात् । इदं तदिति परामर्षाभावात् । तादृशपरामर्शविषयवस्तुगोचरत्वाच्चोपमानोपमेयभावस्य । नहि देवदत्तो गच्छतीत्यादौ देवदत्तादिशब्देन स गच्छत्ययं पचतीत्यादौ तदिदमाद्यैः पदैर्यथा देवदत्तादीनां परामर्षः तथा क्रियाया अस्ति । इयमित्यादिना क्रियायाः सिद्धरूपापन्नाया एवाभिधानात् । किं बहुना क्रियादिपदैरपि पचतीत्यादि समानाकारकप्रत्ययानुपधानात् । अत एवोक्तं मीमांसकैः—

यादृशी भावनाख्याते धात्वर्थश्चापि तादृशः ।
नासौ तेनैव रूपेण कथ्यतेऽन्यैः पदैः क्वचित् ॥

नच तथाप्युपमानोपमेयभावस्य कानुपपत्तिरिति वाच्यम् । साधारणधर्मनिबन्धनत्वादुपमायाः असिद्धायाश्च क्रियाया धर्मानाश्रयत्वात् । तदाश्रयत्वाङ्गीकारे तु सिद्धरूपत्वापत्त्या स्वरूपप्रच्यवप्रसङ्गादित्यभिप्रायस्य पञ्चमे वक्ष्यमाणत्वात् । नचासिद्धेऽपि घटादौ प्रागभावप्रतियोगित्वादिधर्माणां सत्त्वादिदमयुक्तमिति वाच्यम् । प्रतीतिबलादन्यथानुपपत्त्या च तत्र तथात्वेऽपि प्रकृते मानाभावात् । अत एवातीतघटादौ घटत्वं नास्तीति तार्किकाः । अपिच परिपूर्णेन चन्द्रादिना न्यूनधर्मस्य मुखादेरुपमानक्रिया च सर्वा स्वाश्रये परिसमाप्ता । उत्कर्षापकर्षहीनत्वात् । तदुक्तम् ।

येनैव हेतुना हंसः पततीत्यभिधीयते ।
अतो तस्य समाप्तत्वादुपमानार्थो न विद्यते ॥

अधः संयोगहेतुत्वस्योभयसमवेतपतने साम्यमेवात्र समाप्तिप-

दार्थः । भिन्नजातीयानां च क्रियाणां सादृश्यं नास्ति । उभयानुगतधर्मस्यैवोपमानियामकत्वात् । क्रियात्वस्य त्वकिञ्चित्करत्वात् । तदेतदभिप्रेत्योत्प्रेक्षायां लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः । इत्युदाहृत्याचार्यदण्डिनोक्तम् ।

केषाञ्चिदुपमाभ्रान्ति रिवश्रुत्येह जायते ।
नोपमानं तिङन्तेनेत्यतिक्रम्याप्तभाषितम् ॥

अयमर्थः किमत्रोपमानम् । न तावत्कर्ता । तस्य धात्वर्थभावनायां विशेषणत्वेन इवार्थे प्रकारत्वासम्भवात् । अन्यविशेषणस्यान्यत्रान्वयायोगात् । तदुक्तम्—

कर्ता यद्युपमानं स्यान्न्यग्भूतोऽसौ क्रियापदे ।
स्वक्रियासाधनव्यग्रो नालमन्यद्व्यपेक्षितुम् ॥

स्वविशेष्यक्रियायां साधनं विशेषणत्वेनान्वयः । तत्र व्यग्रः तदन्वये निराकाङ्क्षः । अन्यत्क्रियाभिन्नं व्यपेक्षितुं स्वप्रकारकान्वयबोधे विशेष्यतामापादयितुमसमर्थः । नच यथा पृथिव्यामेव गन्ध इत्यादौ सप्तम्यर्थविशेषणस्यापि पृथिव्यादेरेवकारार्थेऽन्योन्याभावेऽन्वयायोभयत्र युगपदेवान्वयो व्युत्पत्तिवैचित्र्यात् । यद्वा एवकारस्य समभिव्याहृतपदार्थतावच्छेदकावच्छिन्नान्यत्वबोधकत्वमिति कल्प्यते । तथात्र कर्तुर्भावनायां सादृश्येच समभेवान्वयः । यद्वा इवपदस्य कर्तृसादृश्यपरत्वमिति वाच्यम् । तथापि लेपकर्तृसदृशं तम इति बोधासम्भवात् । धात्वर्थस्य कर्तरि विशेषणत्वानुपपत्तेः । क्रियाप्राधान्यभङ्गापत्तेश्च । नच लेपकर्तृसदृशतमःकर्तृका लेपक्रियेति बोधोऽस्त्विति वाच्यम् । विकल्पासहत्वात् । किमत्राख्यातार्थस्य कर्तुः सादृश्ये क्रियायां चान्वयः उत कर्तृविशिष्ट एवेवपदार्थः । नाद्यः । धात्वर्थे एव तदन्वयात् । नान्त्यः । साहि धात्वर्थलेपस्योभयत्रान्वयात् । लेपकर्तृसादृश्यस्ये-

वपदार्थत्वाद्वा । नाद्यः । तस्य विशेषणत्वायोगात् । नान्त्यः । उपमानस्य इवादिपदार्थबहिर्भावनियमात् । उपमेयतावच्छेदकरूपानवच्छिन्नत्वेन प्रतियोग्युपस्थितेः । सादृश्यबुद्ध्यपेक्षितत्वाच्च लेपकर्तृत्वेनैव सादृश्यविवक्षायां धर्मोपमानयोरैक्यापत्तेश्च । धर्मान्तरेण च लेपकर्तृसादृश्यस्य प्रकृतानुपयोगात् । अप्रसिद्धसादृश्यस्थले तन्निमित्तधर्मोपादानावश्यकत्वाच्च । चन्द्र इव मुखमित्यादौ प्रसिद्धिबलादाह्लादकत्वादिप्रत्ययसम्भवेन धर्मलोपोपादानयोः स्वीकारेऽपि 'त्रिविष्टपं तत्खलु भारतायते' इत्यादौ 'सुपर्वभिः शोभितमन्तराश्रितै' रित्याद्यनुपादाने सादृश्यानुल्लासस्याभियुक्तानुभवसिद्धत्वात् इत्यन्यत्र विस्तरः । नापि लेपनमेवोपमानम् । लेपक्रियातमसोः साधारणधर्माभावात् । लेपनस्यैव तद्धर्मत्वासंभवात् । धर्मधर्मिभावस्य भेदनिबन्धनत्वात् । धर्मधर्मितावच्छेदकरूपभेदस्य भेदाभेदवादिभिरप्यङ्गीकारात् । भेदमादायापौनरुक्त्यम् । अभेदमादाय सामानाधिकरण्यमिति तत्सिद्धान्तात् । अतएव कार्यादिस्थलेऽप्यन्यप्रकारेणैव भेदाभेदाभ्युपगमः । तदुक्तं भामत्याम् ।

कार्यरूपेण नानात्वमभेदः कारणात्मना ।
हाटकाद्यात्मना भेदः कुण्डलाद्यात्मना भिदेति ।

तदिदमुक्तं—

यदिलिम्पनमेवेष्टं लिम्पतिर्नाम कोऽपरः ।
स एव धर्मो धर्मी चेत्यनुन्मत्तो न भाषते इति ।

स्यादेतत् । 'तेन तुल्यं क्रियाचे'दिति सूत्रे क्रियाया उपमेयत्वं सूत्रवार्तिकभाष्यसिद्धं उक्तयुक्त्या तन्न स्यात् । उपमेयभूतायाऽपि क्रियायाः सामान्यधर्माश्रयत्वविवक्षायां सत्त्वरूपत्वप्रसङ्गादुपमानक्रियातो वैलक्षण्यनिरुक्तेरिति चेत् ।

उच्यते । क्रियाया उपमानत्वं नास्तीत्यत्रैव ग्रन्थकाराणां तात्पर्यम् । सत्त्वरूपत्वप्रसङ्गस्तु युक्त्यन्तरस्योपलक्षणम् । तथाहि कूलं पिपतिषतीत्यत्रेवपदाध्याहारो विवक्षितः, अन्यथानुपपत्त्या लक्षणा वा ? नाद्यः । पिपतिषायाः सादृश्यप्रतियोगित्वं, कूलस्य वा । नाद्यः । धात्वर्थस्य वाक्यार्थे प्राधान्योपगमात् । भावप्रधानमाख्यातमिति निरुक्तस्मरणाच्च । नच सत्त्वार्थकापेक्षयैव विशेष्यत्वं तदर्थ इति वाच्यम् । नहीदं वाचानिकं येनोक्तरीत्या व्यवस्थाप्येत किन्तु लाघवतर्कसहकृतानुभवसिद्धं तथाचान्यत्र तदन्वये कार्यकारणभावकल्पनावश्यकत्वम् । आख्यातार्थकर्त्रादेरपि लिङ्गसंख्यानन्वायित्वेन तत्रापि तद्विशेषणत्वापत्तेश्च । फलस्यापि तथात्वाच्च । नचाख्यातार्थापेक्षयैव प्राधान्ये तात्पर्यम् । प्रथमान्तस्य विशेष्यत्वप्रसङ्गात् । तस्मात्क्रियान्तरापेक्षया तिङन्तक्रियायाः प्राधान्यम् । अत एव पचति भवति पश्य मृगो धावति इत्यादौ कर्तृत्वकर्मत्वाभ्यां पाकधावनक्रिययोर्भवनदर्शनक्रियान्वयः । भोक्तुं पचतीत्यादौ सामानाधिकरण्येन तुमुन्प्रकृत्यर्थस्य तिङन्तार्थक्रियान्वयश्च सूत्रसिद्ध इत्यग्रे विस्तरः ।

किञ्च क्रियासादृश्यस्य कूले नान्वयः । अयोग्यत्वात् । अन्यस्य चानुपस्थितत्वात् । न द्वितीयः । कूलसादृश्यस्यापि पिपतिषायामभावात् । एतेन इवद्योतकत्वेनाप्यनिस्तारः । नापि लक्षणेति द्वितीयः । पिपतिषासदृशे लक्षणायाः शङ्कितुमप्यशक्यत्वात् । क्रमिकव्यापारसमूहस्यैव क्रियात्वेन धातोस्तदतिरिक्तांशबोधने लक्षणयाप्यसामर्थ्यात् । अत एवेच्छाजन्यसदृशस्य सनर्थतया तस्यच पतनान्वयात् । कूलकर्तृकं इच्छाजन्यसदृशं पतनमिति बोधोऽप्यनाशङ्क्यः । प्रकृत्यर्थप्रकारकबोधंप्रति प्रत्ययजन्योपस्थितिहेतुतायाः क्लृप्तत्वात् । इच्छाजन्यत्वस्य पदार्थान्तरसाधा-

रणतया उपमानविशेषानवधारणाच्च। तादृशपतनपरत्वेऽपि गौरवाधिक्याच्च।

ब्राह्मणवदधीते इत्यादौ तु ब्राह्मणपदस्य तदुपादानकाध्ययनपरत्वेऽपि तिङन्तानुपस्थाप्यत्वादध्ययनस्य वतिप्रत्ययार्थे सादृश्ये प्रतियोगित्वेनान्वयः। तस्यच तिङन्तार्थाध्ययनक्रियायामिति नदोषः। रोदितीव गायतीत्यादौ तु सादृश्यसम्बन्धेन क्रियायाः क्रियान्तरेऽन्वयः। इवपदस्य तात्पर्यग्राहकत्वात्। अत एवासत्त्वरूपत्वनिर्वाहः। पदान्तरार्थे विशेषणत्वानापन्नत्वात्। कर्मत्वकर्तृत्वयोरपि संसर्गतायां एवोक्तत्वात्। नचोपमेयक्रियाया अधिकरणत्वापत्तिरितिवाच्यम्। वृत्तिनियामकसंबन्धावच्छिन्नाधिकरणत्वस्यैव मुख्यत्वात्तस्यचात्रानवगमात्। वैशिष्ट्यमात्रस्य तथात्वे पर्वतीयो वह्निरित्यादौ व्यभिचारात्। अतएव भट्टमते भूतलाभावयोस्तादात्म्याङ्गीकारे भूतले घटाभाव इत्यादावाकाङ्क्षोत्थापनार्थं सप्तम्या उपयोगो नत्वधिकरणत्वबोधार्थमिति सिद्धान्तः।

एवंच कारकविभक्तिप्रकृतिपदानभिधेयत्वादेवासत्त्वभूतत्वम्। लिङ्गानन्वयस्तु स्पष्ट एव। संख्या तु यद्यपि उष्ट्रासिका आस्यन्ते हतशायिकाः शय्यन्ते इति भाष्यप्रयोगबलात्प्रतीयते तथापि ण्वुलर्थे भाव एव तदन्वयो नतु धात्वर्थे। तस्य संख्यांशे निराकाङ्क्षत्वेन तदन्वयानुपपत्तेः। अन्यथा चैत्रेण स्थीयते इत्यादौ एकत्वस्याप्यन्वयापत्तेः। एतेन कारकसंख्यान्वयेऽपि सर्वनामपरामर्षानर्हत्वादेवासत्त्वरूपतेत्यपास्तम्। सेकोचे मानाभावादित्यग्रे विस्तरः।

प्रकृतमनुसरामः। यद्वा इच्छेवेच्छा इच्छाशब्दस्य सत्त्वभूतार्थाभिधायित्वात्तदर्थस्योपमानत्वात्। अत इच्छासदृशेऽपि व्या-

पारे सन्निधिः । सच व्यापारोऽवयवशैथिल्यप्रयोजकत्वेन कू-लावयवनिष्ठस्पन्दादिः । लक्ष्यानुरोधेन गौणमुख्यन्यायाप्रवृ-त्त्या उभयत्र प्रत्ययः । यत्तु समाधानान्तरं भाष्ये सर्वस्य वा-चेतनावत्त्वात् । आस्कन्दकपिलकेत्युक्ते तृणमास्कन्दयति, अ-यस्कान्तमयः संक्रामति, शृणोत ग्रावाण इति लिङ्गाच्चेति ।

यच्च व्याख्यातं आत्माद्वैतदर्शने एतत् । वैचित्र्येण च सर्व-पदार्थानामुपलम्भात् सर्वत्रातिप्रसङ्गो नोद्भावनीय इति तत्प्रौढि-वादमात्रम् । ब्रह्मैवेदं सर्वमित्यादौ बाधायामध्यासे वा सामाना-धिकरण्यं नत्वभेदे इति वेदान्तिभिरभ्युपगमात् । अतएवोक्तम् ।

अस्ति भाति प्रियं रूपं नामचेत्यंशपञ्चकम् ।
आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥
खवाताग्निजलोर्वीषु देवतिर्यङ्नरादिषु ।
अभिन्नाः सच्चिदानन्दा भिद्यते रूपनामनी ॥ इति ।

सांख्यैरपि अचेतनप्रकृतिपरिणामित्वाभ्युपगमात् इति-दिक् । ग्रामं गन्तुमिच्छतीत्यत्र ग्रामगमनयोरुभयोरपि इषिकर्म-त्वे ग्रामाय गन्तुमिच्छतीति गत्यर्थकर्मणीति चतुर्थी न स्यात् । गतिकर्मत्वाभावात् । गमेर्ग्रामः कर्म इषेस्तु गमनामित्युक्तौ च इष्यते ग्रामो गन्तुमित्यत्र कर्मप्रत्ययेन ग्रामस्याभिधानं न स्यात् । तस्येषिकर्मत्वाभावात् । स्वप्रकृत्यर्थसाधनत्व-प्रकारस्यैव प्रत्ययाभिधेयत्वात् । तस्माद्गमेर्ग्रामः कर्म इषेस्तु ग्रामो गमनं चेति सिद्धान्तः । इष्यते ग्रामोगन्तुमित्यत्र गमनस्य ग्रामार्थत्वादप्राधान्याद्भिन्नकक्षयोः कर्मणोरेकेनाभिधातुमशक्य-त्वात् । प्रधाने कार्यसंप्रत्ययाद्ग्रामस्यैवाभिधानम् । इषिक्रियाया-श्चाख्यातान्तवाच्यतया प्राधान्यात्प्रधानशक्त्यभिधानेन ग्रामात्प्र-थमा । गमिक्रियाया गुणत्वात्तदपेक्षया द्वितीयाचतुर्थ्योरनुपपत्तेः ।

गुणस्य प्रधानविरुद्धकार्यानारम्भकत्वादिति प्रागुक्तम् ।

शैषिकान्मतुवर्थीयाच्छैषिको मतुवर्थिकः ।
सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते ॥

यद्यपि सनैव इच्छाया अभिधानान्न पुनः सन्निति न वक्तुं शक्यम् । पाकेच्छायास्तेनाभिधानेऽपि पाकेच्छाविषयकेच्छाया अनुक्तत्वात् । अन्यथा प्रतीषिषतीत्यत्र इषेरपि सन्न स्यात् । तथापि वाचनिक एवायं निषेधः । इच्छासन्नन्ते चायम् । जिगुप्सिषते मीमांसिषते इत्यादौ स्वार्थसन्नन्तादिच्छासन इष्टत्वात् । शैषिकादित्यादावुदाहरणम्—शालायां भवः शालीयो घटः तत्र भवमुदकमिति पुनः छ प्रत्ययो न । विरूपस्तु भवत्येव । अहिच्छत्रे भव आहिच्छत्रः तत्रभव आहिच्छत्रीयः । दण्डोऽस्यास्तीति दण्डिकः सोस्यास्तीति पुनर्नठन् । विरूपस्तु भवत्येव । दण्डिमती सेनेति । एवंच वह्निमद्वानिति तार्किकप्रयोगाः प्रामादिकाः । तसौ मत्वर्थेइति भसंज्ञात्वात्पदकार्यस्य जश्त्वस्य च दुर्लभत्वात् ।

इति श्रीसिद्धान्तसुधानिधौ तृतीयाध्यायस्य
प्रथमे पादे प्रथमाह्निकम् ।

—:*:—

अथ द्वितीयमाह्निकम् ।

सुप आत्मनः क्यच् ॥ ८ ॥

स्वाश्रयसम्बन्धित्वेनेच्छाविषयार्थकात्सुबन्तात्क्यच्प्रत्ययो वा । स्वपदमिच्छापरम् । स्वाश्रयत्वं समवायित्वं धात्ववयवत्वात्सुपो लुक् । क्यचीचेतीत्वम् । पुत्रमात्मन इच्छति पुत्रीयति । पुत्रविषयकेच्छाबोधे पुत्रस्य स्वीयत्वं स्वरूपसदेव प्रयोगनियामकं तत्र तस्य शाब्दे प्रकारत्वानुभवविरोधात् । यद्यपि क्यचश्चकारो नान्तोदात्तत्वार्थः एकाच्त्वेन प्रत्ययस्वरेणैव सिद्धेः पूर्वं प्रत्ययस्वरः पश्चात्सातिशिष्टो धातुस्वर इति क्रमसत्त्वात् । नापि क्यचीचेत्यत्र विशेषणार्थः । तदनुबन्धकग्रहणे नातदनुबन्धकस्येत्यतएव क्यषो व्यावृत्तेः । तन्मात्रानुबन्धकमपहाय तत्तदतिरिक्तोभयानुबन्धकस्य न ग्रहणमित्यस्य तदर्थत्वात् । नापि नःक्ये इत्यत्र सामान्यग्रहणविधातार्थः । अन्यथोक्तरीत्या तत्रक्यषो ग्रहणं न स्यात् । ननु इच्छेति भावेप्रत्ययः । आत्मन इति कर्तरि षष्ठी । क्रियाकारकसम्बन्धस्यान्तरङ्गत्वात् । तथाच राज्ञः पुत्रमिच्छतीत्यत्रापि क्यच्स्यात् । मैवम् । आत्मन इति विशेषणवैयर्थ्यात् । उक्तसम्बन्धमनादृत्य सुबन्तेनैवान्वयात् । तद्द्वारकस्यैवात्मन इच्छासम्बन्धस्य वाच्यत्वात् । तथाचेच्छासमवायिनः सुबन्तस्य च यःप्रसिद्धसम्बन्धस्तस्येष्यमाणतावच्छेदकत्वे क्यजिति फलितम् । अन्यथा एषितृस्वामिजन्यत्वस्य राजपुत्रेऽपि सत्त्वादोषतादवस्थ्यात् । मात्वाट्टका अघायवो विदन्नित्यादौ तु व्यसनस्य स्वसंबन्धित्वेनेच्छानुपपत्त्या छान्दसःक्यच् । ज्ञापकं चात्रेत्त्वबाधनार्थमाकारविधानम् ।

न्यायरसिकों को अपूर्व लाभ।

* कारिकावली *

मुक्तावली और न्यायचन्द्रिका सहित।

भारतवर्षके प्रायः सभी पंडित तथा विद्यार्थिगण विश्वनाथन्याय-पंचानन कृत 'न्यायसिद्धान्तमुक्तावली' से परिचित हैं, तथा पढ़ते पढ़ाते भी हैं। क्यों कि ऐसा न्याय वैशेषिक के मत का नवीन और प्राचीन दोनों लेखशैली से बना हुआ दूसरा ग्रंथ अभीतक प्रचलित नहीं है। परन्तु वह भी प्रायः जगह २ पर नयी न्यायशैली अधिक होने से न्यायशास्त्र के सिद्धान्तमात्र का परिचय चाहनेवालों के लिये वैसी उपयोगी नहीं है जैसी षट्दर्शनव्याख्याता पं० नारायणतीर्थ कृत 'न्यायचन्द्रिका'। यह सोचकर हमने यह अपूर्व व्याख्या परीक्षार्थियों के उपकारार्थ ढुंढिराजशास्त्री कृत टिप्पणी सहीत मुक्तावली के साथ अपने यहां सुंदर बम्बई टाइप में शुद्ध कराय मुद्रित की है। न्यायचंद्रिकाका महत्त्व ग्रंथ देखनेहीसे मालुम पड़ेगा उसके विषय में अधिक लिखना व्यर्थ है। ग्रंथ का मूल्य भी सब के उपकारार्थ १) रु. मात्र रखवा गया है।

इसके अलावे हमारे यहां हरतरह के संस्कृतग्रन्थ तथा भाषा-साहित्य की पुस्तकेंभी मिलती हैं और भी हमारे यहां हर तरह की छपाई तथा जिल्द के बंधाई का कार्य भी होता है। एक बार पत्र व्यवहार कर देखीये, और पुस्तकों का बड़ा सूचीपत्र मुफ्त मंगाकर देखीये।

पुस्तक मिलने का पता—

जयकृष्णदास-हरिदास गुप्त,

चौखम्बा संस्कृत सीरिज़ आफिस

विद्याविलास प्रेस, गोपालमंदिरलेन,

बनारस सिटी।